भक्तिसूत्रम्

सवृत्ति ।

श्रीत्रिलोकनाथमिश्रेण

प्रकाशितम् ।

॥ श्रीः ॥

अथ

भक्तिसूत्रम्

तपस्समाधिसमुपलब्धसकलशास्त्रस्वातन्त्र्यझोपाह्वमैथिलश्री-
मत्सत्यनारायणशर्म्मविरचितश्रीमद्ग्रन्थकारशुश्रूषुनैष्ठि-
कब्रह्मारिगुर्वनुग्रहलब्धविज्ञानश्रीवलभद्रदासशर्म्म-
निर्मितश्रुतप्रकाशिकाख्यवृत्तिसहितम् ।

श्रुतप्रकाशिकाख्यवृत्तिकृतैव संशोध्य सम्पादितम् ।

तच्च

महाराजमिथिलेशश्रीलश्री ५ लक्ष्मीश्वरसिंहधर्मपत्न्याः
श्रीमत्याः श्री ५ लक्ष्मीवतीदेव्या द्रव्यसाहाय्येन
तदनुजमिश्रोपाह्वश्रीत्रिलोकनाथशर्म्मणा ।

काश्यां

श्रीमहेशप्रसाद द्वारा—
"सत्यनाम" मुद्रणालये सम्मुद्र्य प्रकाशितः ।

१९८६ विक्रमाब्दे ।

प्रथमसंस्करणम् १०००

मुद्रणालयदोषेण चास्मद्दृष्टिदोषतः
अत्रत्या अशुद्धयः शुद्धि-पत्रैः शोध्या मनीषिभिः ॥ १ ॥
दृष्ट्वैव शुद्धिपत्राणि पाठ्यमेतत्कृपालुभिः
अर्थावगत्यै नम्रः सन बलभद्रः प्रयाचते ॥ २ ॥

* भक्तिसूत्रम् *

शुद्धिपत्रम्

शुद्ध	अशुद्ध	पृ०	प०
तरास्तुनि- तरङ्गिनी-	द्वितीयास्तु- तिलक	१	१५
ईदृग	इदृग्	४	११
ताक्	ताक्	४	१३
निवृत्त्या	निर्वृत्त्या	५	१
वर्गै	वर्ग	५	१
तन्निर्मुक्तो	निर्मुक्तो	५	१०
मद्यो	सोद्य	६	२८
दारम्	दार	८	३
करणो	करणों	८	२३
रङ्गिनी	रगिनी	१०	१६
परभक्ते	परक्ते	११	१३
मूल्ये	मुल्य	११	१९
जन्यं	जन्य	११	२४
च्चय	यच्च	१३	१८
करुणा	करुण	१४	१६
वग	वाग	१५	२१
ल्पेन	ल्पन	१६	१
मुच्यते	मच्यते	१६	१४
श्रुत्य	श्रत्या	१६	१३
परमा	रमा	१७	१५
शब्दं	शब्दो	१७	१६
हेय	हय	१	२५
पिद्धा	सिद्धा	१९	२
नृणयं	नृयय	२१	२१
मानसव्य	लोकिकव्य	२२	१३

शुद्ध	अशु०	पृ०	प०
वाचिकव्य	लौकिकव्य	२२	१६
कायिकव्य	लौकिकव्य	२२	१९
बुध्यासर्वेषु पदार्थेषु	बुथे सर्वेषु पदाह्र्याषु	२३	१२
सर्वे	सर्वः	२३	२४
बुद्धयाऽपि	बुद्धचा	२५	२३
तरा	तर	२७	१
चरणौ	चरणौः	२७	१
ऐका	एका	२७	९
ऐकात्म्य	एकात्म	२७	११
करु	कारु	२८	२३
णम्	णज	३२	३
स्वप्नेऽचिन्ता	स्वप्नेचिन्ता	३२	१३
भाव	भव	३६	१४
दृढा	दृढ	३६	१४
शनू	शत	३७	२१
ना	नापि	३८	१२
मान	माना	३९	१३
देक	एक	३९	२१
घटरज्जु	रज्जु	४०	१
त्रिकुटी	त्रिकुटि	४१	१९
घ्राण	घ्रान	४१	१९
त्रिकुटी	त्रिकुटि	४१	२१
गतिं	गत	४१	२५
मूर्ध्व	मूध्व	४१	२३

शु०	अ०	पृ०	प०
त्रिकुटी	त्रिकुटि	४२	२
दाढ्यें	दाढ्ये	४२	६
मुत्सा	मुसा	४२	२१
ग्रोध्वं	ग्रोध्व	४३	६
ऊर्ध्व	ऊध्व	४३	१४
निद्रा	निदा	४३	१७
मंध्य	मध्य	४३	२३
अहिं	अहि	४३	२३
ङ्ग	ग	४६	१७
रे	र	४७	७
ती	तिः	४६	८
मूर्ति	मूर्त्ति	४९	२४
मुदे	मदे	४९	२५

विष्णुस्तुतेः शुद्धिपत्रम्

शु०	अ०	पृ०	प०
रुद्धो	रुद्धो	२	१९
तो	नो	३	१४
तौ	ते	३	१६
महान्	महन्	५	१३
त्यूदुर्ध्व	त्यूद्ध	६	१५
भूतिः	भूति	६	२१
नि	ऽनि	७	१६
रश्यं	रस्य	८	१
स्व	स्स्व	८	१०
दिः	दि	८	१४
सौ	सा	१०	१५
यते	यत	११	५
सृतिं	मृतिं	१२	६
भृति	मृति	१२	७
थं	थं	१३	८
तन्य	तन्ये	१४	१७
वली	वला	१५	१२
श्य	ध्य	१६	८

शु०	अ०	पृ०	प०
तं	त	१६	१०
त्न	पन्न	१६	२०
स	सं	१७	११
सद्बुद्धिर्वि दीर्णविदा	सद् बुद्धि द्विदीर्णभिदा	१७	११
भोगैः	योगैः	१७	१७
चन्द्र	चन्द	१८	६
क्षमा	खमा	१८	६
होऽक	होक	१८	७
भू	मू	१८	८
पुरे	परे	१८	१०
त्रऽप	त्रेय	१८	१२
वर्त्ति	वति	८	१४
तासी	आसी	१८	१४
होऽप	होप	१९	३
दाऽध	दाध	२०	२१
वेत्र	वत्र	२०	२०
थुर	धुर	२१	९
न्त्य	न्त्व	२२	१७
व्रज	वज	२३	८
रासरस	रास	२३	१०
गूढो	गूढा	२४	१७
सकल	यकल	२४	१७
सिद्धयै	सिद्धयैः	२५	१९

बोधर्विशति कायाः शुद्धिपत्रम्

शु०	अ०	पृ०	प०
वेत्तु	वतु	१	११
त्रिपदां	त्रिपदा	२	८
ब्रूते	बूते	२	१८
विन्द	वन्द	२	१९
सां	सा	४	१०
वै	व	४	२०



मैथिल महात्मा
पण्डित सत्यनारायण झा

॥ श्रीश्रियेनमः ॥

* अथ *

भक्ति सूत्रम्।

श्रीगुरुचरणकमलेभ्यो नमः।

कर्मोपासनज्ञानात्मककाण्डत्रयं प्रसिद्ध्यति। तत्र कर्म्मज्ञानकाण्डयोः दुरवगाह्यतात्पर्य्ययोर्दुष्करत्वादसाधारणाधिकाराच्च सुकुमारबुद्धीनां तत्रानधिकृतानां कलिकालकलुषितान्तःकरणानां संसारसमुद्रनिमग्नानां दीनानां जनानां भक्तौ प्राप्तरुचीनामुच्चाधिकारिणामपि समुद्धारमिच्छन् दीनवत्सलो निसर्गकरुणार्णवः श्रीमान् भगवान् जगदीश्वरः श्रुतिसिद्धं साधारण्येन सर्वेषां कल्याणकरं शाण्डिल्यसूत्रादिसमुदितं भक्तिकाण्डं निर्णीय तपस्समाधिसंशोधितान्तःकरणत्वेन सर्वत्र सम्यग्दर्शनसम्पन्नस्य अम्बाष्टक (चेटीभवन) टीकाकर्तुः सत्यसाहस्री, बोधविंशतिको, पदेशपञ्चदशी, विष्णुस्तुत्यम्बास्तव, श्रीकृष्णस्तव, प्रथमास्तुतितिलक, द्वितीयास्तुतितिलकाद्यनेकदिव्यस्तोत्ररचयितुः सकलतन्त्रस्वतन्त्रैर्योगसाम्राज्याधिष्ठितैः श्रोत्रियवंशावतंसैर्झोपनामकैर्निजगुरुवर्य्यैः श्री१०८युत योगदत्तशर्मभिः प्रणीतस्य वेदान्तयोगसाङ्ख्यप्रतिपादकस्य सूत्रात्मकस्यामृतोपदेशाभिधानदिव्यग्रन्थस्य भाष्यकर्त्तुर्मिथिलामण्डलान्तर्गतोद्यान (उज्ञान) ग्रामवास्तव्यस्य सकराढीसं श्रोत्रियवंशावतंसस्य श्रीमार्कण्डेयशर्मतनुजनेः झोपाह्वस्य श्रीमत्सत्यनारायणशर्म्मणो हृदीदं भक्तिसूत्रकदम्बं प्रकाशयामास तस्येदमादि सूत्रम्।

अथ भक्त्युपदेशः ... ... १।१।१

अथेतिमङ्गलार्थः। अव्यवहितोत्तरसूत्रे वक्ष्यमाणलक्षणभक्तिः शिथिलरागिणां प्राथमिकज्ञानविषयीक्रियते १।१।१

भक्तिः प्रेमसमुद्रेक ईश्वरे ... ... १।१।२

ईशनाद्यैश्वर्य्यसम्पन्ने जगज्जन्मादिकारणे स्वस्वेष्टदेवतारूपे भगवति सकलविषयप्रीतिपरिवर्त्तनपुरःसरातिशयप्रीतिर्भक्तिरुच्यते १।१।२

इतरत्रापि ... ... १।१।३

कारणेश्वरातिरिक्ते यस्मिन् कस्मिन् शक्तिसम्पन्ने कार्य्यभूतेऽपि विषये यथारुचिप्रेमोद्रेकः भक्तिरेवेति १।१।३

परत्वमपरत्वञ्च क्रमशः ... ... १।१।४

पूर्वोक्तसूत्रद्वयनिरूपितभक्तेः क्रमेण परत्वमपरत्वञ्च ज्ञातव्यम् १।१।४

परत्वं प्रथमायाः संसृतिविच्छित्तेः साक्षाद्बीजत्वात् ... ... १।१।५

या परमेश्वरभक्तिः साधनान्तरमनपेक्ष्य स्वयं संसारं निवर्त्तयति अतः सा परेत्युच्यते १।१।५

अपरत्वं द्वितीयायाः ... ... १।१।६

तदितरभक्तिः परां भक्तिमपेक्ष्यैव परम्परया संसारं निवर्त्तयति। अनुत्पाद्य वा कैवल्यं तां तामुपास्य देवतां प्रापयति। अतः सा भक्तिरपरेत्युच्यते १।१।६

परम्परया तद्बीजत्वात् तत्तत्प्रापकत्वाच्च १।१।७

अस्योक्तसूत्रेण सह व्याख्या

अन्त्या कृतिसंविदोः ... ... १।१।८

शास्त्रज्ञानात् शास्त्रिसंसर्गात् जन्मान्तरीयसंस्कारोदयाच्च प्रथमं श्रुतिस्मृतीहासपुराणोदितवर्णाश्रमानुकूल कर्म्मणि प्रवृत्तिर्नराणाम् ततः संशुद्धेऽन्तःकरणे साधनज्ञानम् ततः साध्यज्ञानम् ततः परम्परया साक्षाच्च भक्तिर्निष्पद्यते। अतः सा तयोःकर्म्मज्ञानयोरवसाने जायते १।१।८

प्रमाणं तत्र वचः पारमर्षं भागवतञ्च १।१।९

भक्तेः कर्म्मज्ञानानन्तर्य्ये परमर्षिभक्त्याचार्य्यवचनं गीता च प्रमाणम् वेदितव्यम् १।१।८

अन्तरालं तयोरिति केचित् ... १।१।१०

ज्ञानकर्म्मणोरन्तराले भक्तिरुपजायते इति केचिद्वदन्ति १।१।१०

प्रवृत्तिरपाके ... ... १।१।११

यावद्भक्तिर्न परिपच्यते तावत्सा प्रवृत्तिरूपा वेदितव्या। अथवा ज्ञानकर्म्मभ्यां निष्पन्नायां भक्तौ परिपाकावस्थामगतायां सत्यां भक्तस्य ज्ञाने कर्म्मणि च प्रवृत्तिरुपजायते भक्तेः परिपक्वत्वाभावात् १।१।११

परिपाके निवृत्तिः ... ... १।१।१२

विशेषेण परिपक्वा भक्तिः निवृत्तिरूपा भवति। अर्थात् परिपाकावस्थां गतायां भक्तौ भक्तस्य पूर्वोक्तज्ञानकर्म्मतो निवृत्तिरुपजायते भगवन्मात्रनिष्ठत्वात् १।१।१२

द्वैतप्रसूता ... ... १।१।१३

भक्तिरूपास्योपासकरूपद्वैतनिष्ठया जन्यते १।१।१३

अद्वैतप्रसवा ... ... १।१।१४

भक्तिः स्वकीयचरमपरिणतौ ब्रह्मात्मकमद्वैतावस्थानं जनयति १।१।१४

इति तपस्समाधिसमुपलब्धसकलशास्त्रस्वातन्त्र्य श्रीमत्सत्यनारायणशर्म विरचितभक्तिसूत्रस्य श्रीसूत्रकारशुश्रूषुनैष्ठिकब्रह्मचारिगुर्वनुग्रहलब्ध विज्ञान श्रीबलभद्रदासकृत वृत्तिसहितस्य

प्रथमाध्यायस्य प्रथमपादः समाप्तः।

अथ प्रथमाध्यायस्य द्वितीयः पादः

सा हि परा भोगापवर्गौ न कामयते निरतिशयसुखरूपरसाश्रयत्वात् स्वस्याः तद्रूपत्वाद्वा अभेदाभ्युपगमात् ... ... १।२।१

उपासकः परां भक्तिमधिगम्य भोगमोक्षौ नाभिलषति भक्तेः सर्वोत्कृष्टपरमानन्दरूपरसपदवाच्यब्रह्माधिकरणकत्वात्। अथवा भक्तिब्रह्मणोर्निर्विशेषसुखरूपत्वेनैक्यात् शास्त्रेणापि सिद्ध्यति तदैक्यम्। तद्भक्तिमतां तन्निष्ठतया तद्रूपत्वात् भोगमोक्षयोर्वैतृष्ण्यम्भवतीतिफलितोऽर्थः १।२।१

अन्तरायाऽनभिभूता दृढभूमिः ... १।२।२

विघ्ना दृढभूमिकां भक्तिं नाभिभवन्ति। अर्थात् दृढभूमिकां गतवतः साधकान् विघ्नाः स्प्रष्टुं न शक्नुवन्तीतिभावः १।२।२

लौकिकविषया सम्पृक्तमनोमात्रगोचरं
स्वरूपं तत्प्रेम्णः ... ... १।२।३

भक्तिरूपस्य तस्य प्रेम्णः स्वरूपं लौकिकैः शब्दादिविषयैरस्पृष्टेन मनोमात्रेण विषयीकर्तुं शक्यते १।२।३

स्वसंवेद्यं कुमारी स्त्रीसुखवत् ... १।२।४

यथा कुमारी स्त्रीसुखं स्वयमेवानुभवति नान्यानुभूतं उपायसहस्रेणाऽपि विज्ञातुं शक्नोति। तथैव भक्तैः स्वयंप्रकाशब्रह्माभिन्नं प्रेम्णः स्वरूपं स्वयमेव विज्ञातुं शक्यं भवतीतिवेदितव्यम् १।२।४

अनिर्वचनीयं सिताशर्करादि रसेदृग्-
भेदानभिधानवत् ... ... १।२।५

यथा सिताशर्करादिरस इदृग् इति कोऽपि तद्रसभेदमभिधातुं न शक्नोति। तथैव भक्तैः स्वरूपं वाचा वक्तुं न शक्यते कैश्चिद् १।२।५

अपरिचिता कृत्रिमशान्तिसन्तोषसुखाश्रयप्रे-
मप्रचयसम्भूतपुलकाश्रुनिर्गमनप्रमुखसात्त्विक-
विकृतिसंजातमनःशैथिल्यपूर्विका सकलेहा-
निवृत्तिः ... ... १।२।६

प्रागदृष्टत्वात् परिचयाविषयीभूताऽनायासलब्धशान्तिसंतोषजसुखाधिकरणकप्रेमसन्दोहेन पुलकाश्रुनिर्गमनादिसात्त्विकविकारा जायन्ते। ततो भवति मनसः शैथिल्यं ततः कायिकवाचिकमानसिकसकलचेष्टा निवर्त्तन्ते। इयमेवनिवृत्यवस्था प्रेम्णः स्वरूपं ज्ञातव्यम् १।२।६

सैव निवृत्यात्मकस्वस्वरुपस्पर्शः ... १।२।७

पूर्वसूत्रोक्तसकलेहानिवृत्तिरेव निवृत्तिरुपात्मनः स्वरूपं भवति। ततः निवृत्तिरूपाऽत्रस्थैव आत्मस्पर्शो विदितव्यः १।२।७

तत्रस्थो जयति कामादीन् शत्रून् ... १।२।८

निवृ त्स्यात्मकस्वरूपोपलब्धिदशापन्नो भक्तः कामादिभिः शत्रुवर्गैरपराभूतोभवति १।२।८

स्पृहयति न सुखम् ... ... १।२।६

निरुक्तस्वरूपस्थितभक्तस्य विषयविरागो भवति। अतः सांसारिकसुखं न स्पृहयति १।२।६

नोद्विजते दुःखात् ... ... १।२।१०

स्वरुपस्थितस्य विषयद्वेषो निवर्त्तते १।२।१०

निःसंशयो भवति ... ... १।२।११

सुखरूप आत्माऽस्ति न वा लभ्यो न वा इत्यादयः संशयाः निवर्त्तन्ते। निर्मुक्तो भवति भक्तः १।२।११

जहात्यसम्भावनादिप्रतिपन्नभावनाः ... १।२।१२

देहातिरिक्तः परोक्षः आत्मा नास्ति। तत्सत्त्वेऽपि विषयसुखाद्धिकसुखरूपो न भवति। आत्मप्राप्तौ प्रमत्तो भविष्यामीत्याद्यसम्भावनादिरूपप्रेमसिद्धिविरुद्धचिन्तनानि त्यजति भक्तः १।२।१२

तृप्यति हृष्यति च ... ... १।२।१३

अनुत्तमसुखरुपस्वात्मलाभात् तत्रैव तृप्तोभवति। प्राक्तनोत्कटसांसारिकदुःखानुपलब्धेः हृष्टो भवति १।२।१३

निस्त्रपो भवति ... ... १।२।१४

व्यवहारदशायाम् प्रेमरसाकृष्टो गाननमनादौ प्राक्तनलज्जां जहाति १।२।१४

निरस्तगोत्राभिजनाद्यभिमानो भवति ... १।२।११

भक्तिमहिम्ना भगवदैक्यलाभात् अमुकगोत्रोऽहम् अमुककुलोत्पन्नोऽहम् पण्डितोऽहम् धनिकोऽहमित्यादि देहानुबन्धिमिथ्याऽहङ्कारं दुरतस्त्यजति १।२।१५

प्रमाद्यत्युत्कण्ठ उद्गायति नृत्यति रौति
मूकति प्रहसति रोदिति स्तौति जपति
प्रजल्पति च ... ... १।२।१६

प्रेमसम्पन्नस्य लोकविलक्षदशां लक्षयति-प्रमाद्यतीत्यादिना ।

भक्तो लोके व्यवहरन्नपि मध्ये मध्ये भगवन्नामरूपलीलाधाम स्मरणसमीरणसंक्षुभितप्रेमापरपर्यायभक्तिरसाप्यायितानुरागमहोदधौ निमग्नः सन् लौकिकव्यवहारच्युतो भवति । यथा रहस्य-विचारसमये कण्ठं भित्वा उच्चस्वरैरुद्गायति । उपवेशनसमये उत्थित्वा गात्रादिविक्षेपणं करोति । मौनावलम्बनसमये शब्दयति । कथनसमये मूको भवति । रुदनसमये प्रहसति । प्रहसनसमये रोदनं करोति । निन्दनसमये स्तवनं करोति । स्तवनसमये निन्दति प्रजल्पसमये जपति । जपसमये प्रजल्पति । इत्यादि प्रमादयुक्तत्वं प्रस्फुटं भवति निरतिशयप्रेमसमुद्रेकवतो भक्तस्य लोके १।२।१६ ॥

विस्मरति विश्वम् भजनीयमविस्मरति १।२।१७

ननु प्रमादयुक्तत्वे भगवद्विस्मरणमपिसम्भवतीत्याह—विस्मरतीति। जगद् विस्मरति न तु भगवन्तम् भगवन्मात्रनिष्ठत्वेन प्रमादयुक्तत्वस्य सम्भवात् १।२।१७।

क्वापि तदुपलब्धिः पुण्यसम्भारसंचयात् … १।२।१८

अव्यवहितपूर्वसूत्रोक्तदशा कस्मिंश्चिद्धन्यतमे जने प्राक्तनविद्यमानजन्मोपार्जितपुण्यबाहुल्याद् दृश्यते १।२।१८ ॥

सौत्रेश्वरशब्दः संगृह्णाति वासुदेवप्रभृतीनपि साकृतीन् तथाभ्युपगमात् सम्प्रदाय-दर्शनाच्च … … … १।२।१९

प्रथमाध्याय द्वितीयसूत्रेश्वरशब्देन साकारा वासुदेवप्रभृतयोऽपि संगृह्यन्ते । शास्त्रमपितान् ईश्वरशब्देन शास्ति । लोके वैष्णवादिसम्प्रदायेऽपि तथात्वं स्वीक्रियते ।१।२।१९

ईश्वरभक्तेरीश्वरसम्पत्तिः … … १।२।२०

ईश्वरभक्त्या भक्तः ईश्वरसम्पन्नः केवलो जायतेइत्यर्थः १।२।२०

इतरासक्तिरितरायाः … … १।२।२१

भक्त ईश्वरातिरिक्तभक्त्या तमु पास्यं लभते १।२१

सोद्यमुक्तिर्विपरिपाकात् … … १।२।२२

विशेषेण परिपक्वा पराभक्तिः सद्योमुक्तिं साधयति १।२।२२

अपाकात् क्रममुक्तिः … … १।२।२३

अपक्वा पराभक्तिः क्रममुक्तिं साधयति १।२।२३

पुनरावृत्तिरितरासक्तेः … … १।२।२४

ईश्वरातिरिक्तोपास्यभक्तः इतरं प्राप्य पुनरावर्त्तते १।२।२४

आसत्तौ तारतम्यं देशकृतं कालकृतं च भक्ति-तारतम्यात् … … … १।२।२५

सतीतरोपास्यलाभे तत्समीपस्थितौ दृढभूमिकाऽदृढभूमिक-भक्तितारतम्यात् समीपासमीपदेशकृतं चिराचिरकालकृतञ्च तार-तम्यम्भवति १।२।२५

भजनीयप्रसादं विघ्नविध्वंसं मार्गप्रदर्शनं सिद्ध्यविलम्बं च सम्पादयति भक्तिर्गुरूणाम् १।२।२६

गुरूणाम्भक्तिः समीचीनमार्गप्रदर्शनं विघ्नविनाशं सिद्ध्यवि-लम्बमिष्टदेवताप्रसादञ्च जनयति १।२।२६

अव्यक्तप्राक्तनाभ्याससंस्कारोद्बुद्धविद्यमाननिसर्गार्त्तिजिज्ञासार्थार्थित्वज्ञानानि प्रयोजकानि भक्तेः १।२।२७

शुकादिवज्जन्मान्तरीयाभ्यासजन्याप्रकटितान्तःस्थानुशयरूप संस्कारप्राप्तविद्यमानस्वभावः, आर्त्तिः जिज्ञासा, अर्थार्थिता, ज्ञानञ्च भक्तिं प्रयोजयति १।२।२७

औदार्य्यं पञ्चकेऽपि … … १।२।२८

पञ्चानामपि महत्वं विद्यते। सामान्येन भक्तिसम्पादकत्वात्। "उदारो दातृमहतोः" इतिकोशः १।२।२८

परमौदार्य्यं ज्ञाने प्रेमाधिक्यनिमित्तत्वाल्लोके शिष्यादीनां गुर्वादिमहिमज्ञानात् तथात्व-दर्शनात् … … … १।२।२९

यथालोके शिष्यादयो गुर्वादीनां महिमानं ज्ञात्वा तेषु प्रेमाधिक्यं कुर्वन्ति। तथा भक्तो भजनीयमहिमानं ज्ञात्वा तेषु प्रेमाधिक्यं करोति। अतः ज्ञानं परमोदार इतिवेदितव्यम् १।२।२९

न प्रयोजकत्वं मुमुक्षायाः मोक्षेच्छाप्रतिषेधस्मरणात् भक्तानाम् ... ... १।२।३०

सामान्यप्रयोजककुक्षिप्रविष्टापि मुमुक्षा न भक्तेः प्रयोजिका यतः ज्ञानकाण्डश्रवणादिसाधनसम्पन्नमुमुक्षुवत् भक्तिसाधनवान् भक्तः मुक्तिं नापेक्षते। इमामनपेक्षाम् दर्शयति स्मृतिः "न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम्। न योगसिद्धिं न पुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत १४। अ. १४ भा. ए. १।३।३०

भक्तिरेवफलमित्याचार्याः ... ... १।२।३१

भक्त्यधिकारे आचार्य्याः साधनभूतभक्तेः फलं साध्यभक्तिमेव स्वीकुर्वन्ति १।२।३१

निर्मोक्षप्रसंग इतिचेन्नानिच्छतोऽपि भक्तस्य तत्प्राप्तिस्मरणात् १।२।३२

एवं भक्तानां निर्मोक्षो नाशङ्कनीयः यतः "अनिच्छतोऽपि मे भक्तिर्गतिमएवीं प्रयच्छते" इतिस्मृत्या अनिच्छतामपि तेषां मुक्तिः सिद्ध्यतीतिसमर्थ्यते १।२।३२

अविशेषः सुखमयपरभक्तिनिष्पत्तिस्थितिमुक्तिस्थित्योरन्तःकरणोपाधिविलयाविद्याभङ्गविषयवासनादिराहित्यसाम्यात् ... १।२।३३

सुखस्वरूपायाः पराया भक्तेर्निष्पत्तिस्थितौ मुक्तिस्थितौ च उभयत्रान्तःकरणोपाधिविलयाऽविद्याभङ्गविषयवासनाराहित्यसाम्यान्न भेदः १।२।३३

प्रारब्धं विशेष इति चेन्नोभयत्र तत्साम्यात् आशरीरविरहात् ... ... १।२।३४

उभयोः प्रारब्धं विशेष इति न शङ्कनीयं शरीरस्थितिपर्य्यन्तं तयोः कुलालचक्रभ्रमणवत् प्रारब्धवेगेन आवश्यकीयव्यवहारे प्रवृत्तत्वात् १।२।३४।

विरहे उभयत्र तदसत्वसाम्यम् ... १।२।३५

शरीरापगमे उभयोः प्रारब्धविलयनं समम् अतो न विशेषः १।२।३५

अभेदो वस्त्वैक्यान्नाम्ना भेदः ... १।२।३६

परभक्तिनिष्पत्तिस्थितिमुक्तिस्थित्योर्वास्तविकैक्यादभेदः परभक्तिनिष्पत्तिजीवनमुक्त्योरैक्यात् नाम्ना नाममात्रेण भेदः १।२।३६ ॥

देहेप्यनहम्भावो जीवनमुक्तस्य भक्तस्य यथा सर्पस्य निर्ल्वयिन्याम् ... ... १।२।३७

यथा सर्पस्य जीर्णायां त्वचि नाहं बुद्धिर्भवति तथैव जीवनमुक्तस्य भक्तस्य च देहेऽहं भावोनोत्पद्यते। १।२।३७।

सर्वोपाधिगुणराहित्यं तदनभिमानात् ... १।२।३८

शरीरप्राणमनोऽभिमानाभावाद्भक्तस्य जीवनमुक्तस्यच षड्विधोर्मिराहित्यं भवति तदप्रतीतेः।१।२।३८।

इति तपस्समाधिसमुपलब्धसकलशास्त्रस्वातन्त्यश्रीमत्सत्यनारायणशर्मविरचितभक्तिसूत्रस्य श्रीसूत्रकारशुश्रूषुनैष्ठिकब्रह्मचारिगुर्वनुग्रहलब्धविज्ञानश्रीबलभद्रदासकृतश्रुतप्रकाशिकाख्यवृत्तिसहितस्य प्रथमाऽध्यायस्य द्वितीयः पादः समाप्तः।

* अथ प्रथमाऽध्यायस्यतृतीयः पादः प्रारम्भः *

सर्वकामैर्मोक्षकामैरकामैरपि विधयेत्वात् पराभिधेया मुख्या भक्तिः प्रधानम् ... १।३।१

सर्वकामा मोक्षकामा अकामाश्च पराभिधानां मुख्यां भक्तिं विदधति। अतः सा प्रधानम् १।३।१

एकैककामैर्विधेयत्वाभ्युपगमाद्—अपराभिधेया गौण्यप्रधानम् .... १।३।२

"आरोग्यं भास्करादिच्छेत्" इत्यादि स्मरणात् एकैककामा ईश्वरातिरिक्तमुपासते। अतः सा गौणी भक्तिरप्रधानम् १।३।२

अप्रधानकुक्षिप्रविष्टाऽपि गुरुभक्तिःप्रधानम प्रधानमितिवाऽनुग्रामहिमानुकम्पादीनां गुरोः श्रद्धादीनां शिष्यस्याऽपेक्षितत्वादुभयत्वसम्भ वादनिर्णयात् ... . १।३।३

ईश्वरातिरिक्तगुरुभक्तिर्यद्यपि अपरभक्तिलक्षणाक्रान्तावर्त्तते तथापि तस्याः प्रधानत्वमप्रधानत्वं वा वक्तुं न शक्यते गुरोर्महिं-मानुकम्पादीनां शिष्यस्य श्रद्धाशुश्रूषादीनां चास्यां भक्तौ अपेक्षि-तत्वात्। गुरुमहिमानुकम्पादिशिष्यश्रद्धादिसत्वे मुक्तिसम्भवः। असत्यसम्भवः। इत्युभयसम्भवादेकं प्रधानमप्रधानं वा निर्णेतुं न शक्यते १।३।३

प्रमाणमप्यौपनिषदं प्रधानत्वे १।३।४

उपनिषदपि परायाः भक्तेः प्रधानत्वं श्रावयति १।३।४

अङ्गिनी भक्तिः पराख्या १।३।५

अव्यवहितोत्तरसूत्रनिर्वाचिताङ्गयुक्ता परा भक्तिरङ्गिनीवेदितव्या१।३।५

अङ्गानि कर्म्मज्ञानयोगाः ... १।३।३६

ईश्वरनिमित्तानि कर्म्माणि साधनज्ञानसहितसाध्यज्ञानानि चित्तैकाग्रचनिरोधभूमिसम्पादका योगाश्च उक्तपरभक्तेरङ्गानि वेदितव्यानि १।३।६

उपकार्य्योपकारकत्वात् परस्परम् ... १।३।७

परभक्तेः कर्मज्ञानयोगानां च परस्परम् उपकार्य्योपकारकत्वाद-ङ्गित्वम् अङ्गत्वंच ज्ञातव्यम् १।३।७

स्वामिभृत्ययोरिव ... ... १।३।८

यथा स्वामिनः उपकार्य्यत्वाद्भृत्यस्य उपकारकत्वादङ्गाङ्गित्वं प्रसिद्धं लोके तथैवोक्तपरभक्तेः कर्म्मज्ञानयोगानां चाङ्गाङ्गित्वं ज्ञातव्यम् १।३।८

वैराग्यमप्युपकारकत्वात् ... ... १।३।९

परभक्तेरुपकारत्वात् वैराग्यमपि अङ्गं ज्ञातव्यम् १।३।९

अविरोधो भिन्नविषयत्वात् ... १।३।१०

वैराग्यप्रेम्णोरविरोधः जगदात्मकेश्वरात्मकभिन्नविषयत्वात १।३।१०

ईश्वरप्रणिधानमङ्गाङ्गम् ... ... १।३।११

परभक्त्यङ्गात्मकयोगस्याङ्गभूतत्वात्प्रणिधानस्याङ्गाङ्गत्वम् शास्त्रतः सिद्धम् १।३।११

नाङ्गंसमाधिमात्रार्थत्वात् ... १।३।१२

ईश्वरप्रणिधानम् परायाः भक्तेरङ्गं न भवति। यतस्तस्य योगपद वाच्यसमाधिमात्रे निमित्तत्वम्। उक्तञ्च योगदर्शने "ईश्वरप्रणिधानात्समाधिसिद्धिः" इति १।३।१२

तस्माद्गौणी ... ... १।३।१३

तस्मात् परक्तेरङ्गभूतसमाधिसाधनत्वात् सर्वक्रियाणां परमगुरावीश्वरे समर्पणरूपस्य प्रणिधानस्य गौणीभक्तित्वं वेदितव्यम् १।३।१३

कर्म्म निष्कामं प्रीत्यर्थं कृतं च मनः संशोध्य विकाशयति प्रेमाणम् ... १।३।१४

फलसङ्गावनपेक्ष्य कर्त्तव्यबुद्धयाऽनुष्ठितं निष्कामं, भगवत्प्रीति मात्रनिमित्तकञ्च कृतं कायादिसम्पादितं त्रिविधं कर्म्म वासनादि-मनोमालिन्यमुन्मुल्य संसारतापशामकप्रेमचन्द्रं शरदच्छहृदयाम्बरे उदाययति १।३।१४

ज्ञानं शास्त्रीयमानुभविकञ्च सर्वशक्तिमत्वाऽलौकिकवात्सल्यौदार्य्यसौन्दर्य्यादिमहिमानमवबोध्य वर्द्धयत्येतम् ... १।३।१५

शास्त्रजन्यम् अनुभवजन्यं च ज्ञानं भगवतोऽलौकिकवात्सल्यौदार्य्यसौन्दर्य्यादिविशिष्टत्वम् अघटितघटनापटीयसा महिम्ना सम्पन्नत्वं चावबोध्य तस्मिन्भगवति प्रेमाणं वर्द्धयति १।३।१५

योगो निरोधभूमिक ऐकाग्र्यभूमिकश्च कषा-
यक्षालनपूर्वकं क्लेशानुन्मूल्य निरन्तरदीर्घ-
कालीनमवस्थानं संस्थापयति तस्य ... १।३।१६

निरोधभूमिक ऐकाग्र्यभूमिकश्च योगः वक्ष्यमाणलक्षणः जन्मान्तरीयकुत्सितवासनानिरसनपूर्वकम् अविद्याऽस्मितारागद्वेषाभिनिवेशात्मनः क्लेशान् उन्मूल्य तस्य प्रेम्णः निन्तरम् दीर्घकालव्यापिनीं स्थितिं संस्थापयति १।३।१६

वैराग्यं वासनानिराकरणपूर्वकं द्रढयति भा-
वनाम् ... ... १।३।१७

वैराग्यं दृष्टानुश्रुतसमस्तविषयवासनानिरसनपूर्वकं भगवतोध्यानम् द्रढयति १।३।१७

विविक्तसेवनपरिवाराद्यचिन्तनशमदमादिगुरु-
शुश्रूषणशास्त्रश्रवणमननादीन्यप्यङ्गानि १।३।१८

विविक्तसेवनादि-मननाद्यन्तान्यपि प्रेम्णः अङ्गानि वेदितव्यानि उपकारकत्वात् १।३।१८

उपकुर्वन्ति भक्त्यभक्त्योरानुकुल्यप्रातिकूल्य-
निमित्तत्वात् ... ... १।३।१९

निरुक्तान्यङ्गानि भक्तेरनुकूलत्वेनाभक्तेः प्रतिकूलत्वेनोपकुर्वन्तिप्रेमाणम् १।३।१९

अलभ्यं भगवत्कृपालेशाल्लभ्यं प्रधानमङ्गं
महत्सङ्गः ... ... १।३।२०

महत्सङ्गः प्रधानमङ्गं निरुक्ताङ्गेभ्य उत्कृष्टम् पुण्यसंभारसंजात भगवत्कृपालेशमन्तरा न लभ्यते १३।३।२०

विधेयं विधेयं प्रयत्नादमोघत्वात् ... १।३।२१

महत्सङ्गपदवाच्यं प्रधानमङ्गं प्रयत्नात्पौनः पुन्येन कर्त्तव्यम् अमोघत्वात् १।३।२१

पापं प्रणाशयति सन्तापं शमयति द्रावयति दैन्यञ्च सद्यः ... ... १।३।२२

महतां भगवत्कृपापात्राणां सङ्गः शीघ्रमेव सूत्रोक्तानि कार्याणि सम्पादयति १।३।२२

प्रत्याययति प्रोत्साहयत्युद्योजयति प्रसाधयत्येकान्तमत्यन्तम् ... ... १।३।२३

महत्सङ्गः विश्वासं कारयति। प्रोत्साहं जनयति। आराधने प्रवर्त्तयति। निर्विघ्नां शाश्वतीं सिद्धिं च जनयति १।३।२३

वैराग्ययोगावुपकुर्वन्तौ ज्ञानं भक्तिञ्चाङ्गाङ्गभूतावपि प्रधानाङ्गमङ्गल्यादिवत् ... १।३।२४

वैराग्यं ज्ञानस्य साक्षात्कारणम्। योगश्च साधनभक्तेः साक्षात् कारणम्। अतएव वैराग्ययोगौ परभक्त्येरङ्गाङ्गरूपावपि यथा अङ्गुल्यादयो हस्ताऽवयवभूता अपि स्वयं शरीरस्यावयवत्वेन गण्यन्ते। तथा तावपि अङ्गत्वेन गण्येते १।३।२४

ऊह्यमन्यत्राप्युपकारदृष्ट्या तदङ्गत्वम् ... १।३।२५

यैः यैः परभक्तिरुपक्रियते तत्र तत्र परभक्त्याङ्गत्वमूह्यम् परम्परया साक्षाद्वा परक्तेरुपकरकात्वात् १।३।२५

इत्थं प्रत्याख्यातौ समुच्चयविकल्पौ ... १।३।२६

अङ्गानां समुदायेन एकेन वा परभक्तिः सिद्ध्यतीतिप्रत्याख्यातौ समुच्चयविकल्पौ १।३।२६

प्रयत्नतारतम्यादनेकैरेकेनाऽपि संसिद्धिः १।३।२७

प्रयत्नस्य न्यूनत्वेनाऽधिक्येन च क्वचिदनेकानि अङ्गानि मिलित्वा अङ्गिनीं परभक्तिं निष्पादयन्ति। क्वचिदेकमपि १।३।२७

प्राक्तनसंस्कारसत्त्वादविलम्बः ... १।३।२८

प्राक्तनसंस्कारस्य विद्यमानत्वात् परभक्तिः झटिति सिद्ध्यति १।३।२८

विलम्बस्तदसत्वात् .... १।३।२९

प्राक्तनसंस्काराभावात् विलम्बेन सिद्धिः १।३।२९

निरुपाधिकारुण्यमीश्वरस्य तदवताराणा-मपि .... १।३।३०

ईश्वरस्य तदवताराणामपि प्रत्युपकाराद्यनपेक्षं निष्कारणम् कारुण्यम् १।३।३०

सिद्धं निरुपाधित्वमाप्तकामस्यानवाप्यकामस्य-तस्य ... ... १।३।३१

भगवतोऽवाप्तकामत्वम् अनवाप्यकामत्वञ्च निष्कारणामनुकम्पां साधयति १।३।३१

आप्तकामत्वमनवाप्यकामत्वञ्च प्रत्यभिज्ञा-नात् ... ... १।३।३२

भगवत आप्तकामत्वमनवाप्यकामत्वञ्च शास्त्रं स्वीकरोति १।३।३२

सेव्यतामीश्वरः सेव्यतामीश्वरस्तदवताराश्च १।३।३३

निष्कारणकरुणावान् ईश्वर अनवतीर्णस्वरूपोऽवतीर्णस्वरूपश्च निरुक्तकरुणप्रयुक्तैर्भक्तै पौनःपुन्येन विघ्नभावेऽपि सेव्य-ताम् १।३।३३

इति तपस्समाधिसमुपलब्धसकलशास्त्रस्वातन्त्र्यश्रीमत्सत्य-
नारायणशर्म्मविरचितभक्तिसूत्रस्य श्रीसूत्रकार शुश्रूषु-
नैष्ठिकब्रह्मचारिगुर्वनुग्रहलब्धविज्ञानश्रीबलभद्र-
दासकृतश्रुतप्रकाशिकाख्यवृत्तिसहितस्य
प्रथमाध्यायस्य तृतीयः पादः समाप्तः।

※ अथ प्रथमाऽध्यायस्य चतुर्थः पादः प्रारम्भः ※

वैरूप्यमनिष्पत्तौ भक्तिसंविदोः साधनभेदात् १।४।१

अनिष्पन्ने भक्तिज्ञाने साधनवैसादृश्यात् विसदृशे भवतः १।४।१

सारूप्यन्तु निष्पत्तावुपाधिलयसाम्यात् ... १।४।२

भक्तिज्ञानयोर्निष्पत्तिदशायां सादृश्यं भवति। शरीरादिरूपोपाधीनां स्वरूपलयसाम्यात् १।४।२

अत्राऽपरोक्षायाः संविदोग्रहणम् ... ... १।४।३

अस्मिन् प्रकरणे संवित्पदेनाऽपरोक्षा संविद् गृह्यते १।४।३

**कश्चिद्वैरूप्यगन्धोऽस्फुटप्रेमरसानुसरणा–
सरणाभ्याम् ... ... १।४।४**

परभक्त्यपरोऽक्षज्ञानयोर्निष्पत्तावपि वागगोचरवैसादृश्यलेशः क्रमशः भक्तौ अव्यक्तप्रेमरसानुसरणेन ज्ञाने तदसरणेन च विद्यते१।४।४

**सौकर्यं भक्तौ विद्यादिपरिश्रमाभावाद्
भगवदाश्रयत्वाच्च ... ... १।४।५**

भक्तौ विद्याधनाद्यर्जनादिपरिश्रमाभावात् निष्पादने सुकरता वर्त्तते। सर्वदा भगवता आश्रयीभूतेन रक्ष्यत्वात् १।४।५

**दुःखमितरत्र तदादिप्रयोजनादव्यक्तगति
कत्वाच्च ... ... १।४।६**

इतरत्र संविदि दुष्करत्वं वर्त्तते। तस्याः विद्यादिपरिश्रमप्रयोजकत्वात् प्राप्यस्य च अव्यक्तत्वात् १।४।६।

प्रमाणान्तरानपेक्षित्वमनुभवगम्यत्वात् १।४।७

प्रमाणान्तरस्य अपेक्षा न विद्यते अनुभवगम्यत्वात् स्वस्येतिशेषः १।४।७॥

आनुभविकत्वं शान्त्यानन्दरूपकत्वात् १।४।८

यतः परभक्तेः शान्त्यानन्दरूपत्वं स्वेनैवानुभूयते ततः प्रमाणान्तरानपेक्षानुभवागम्यत्वं प्रसिद्धं तस्याः। १।४।८

भक्तोश्वरयोरभेद एकरूपत्वस्मरणात् ... १।४।९

भक्तीश्वरयोरेकरूपत्वेन- स्मरणादभेदः। भक्तेः ईश्वरेणाभेदः भक्त्यधिकारे तथा स्मरणात् १।४।९

तदल्पनापि क्षीयन्ते महापापानि ... १।४।१०

भक्तीश्वरयोर्द्वयोरीश्वरैकरूपतामापन्नायाः परभक्तेः ईश्वरापेक्षया स्वल्पत्वेनापि महापापानि स्मृतिप्रोक्तानि क्षीयन्ते। अथवा भक्तेरल्पेनाप्याचरणेन महापापानि शास्त्रसिद्धानि नश्यन्ति १।४।१०

नान्यत्प्रायश्चित्तम् ... ... १।४।११

साध्यभक्त्यधिकारिणां भगवद्भक्त्यतिरिक्तं नान्यत्प्रायश्चित्तं विद्यते १।४।११

भक्त्यधिकारे तथा स्मरणात् ... १।४।१२

भक्तिशास्त्रे स्मरणादिरूपायाः भगवद्भक्तेः सर्वपापविनिवर्त्तकत्वेन स्मरणात् ।१।४।१२।

ज्ञानान्मुक्तिरितिश्रुतिसिद्धान्तः तस्या भक्तेः प्रकृष्टप्रयोजकत्वात् .... १।४।१३

ज्ञानान्मुक्तिरिति श्रुतिसिद्धान्तेन ऋतेज्ञानेन मुक्तिरितिश्रुत्या ज्ञानस्य भक्तेः प्रकृष्टप्रयोजकत्वमुच्यते ।१।४।१३

सर्वेषामधिकारो वर्णाश्रमाद्यनियमात् .... १।४।१४

भक्तौ सर्वेषां ब्राह्मणादिवर्णानां ब्रह्मचार्य्याद्याश्रमिणामधिकारो विद्यते। तत्र वर्णाश्रमादीनां नियमस्याभावात् १।४।१४

भक्तिर्ज्ञानाय कल्पत इत्यप्रधानपरमभिधानम् ... . १।४।१५

"भक्तिर्ज्ञानाय कल्पते" इति स्मृतिघटकभक्तिपदेन साधनरूपाया अङ्गभूताया गौण्या भक्तेरभिधानम्। न तु मुख्याया इति वेदितव्यम्। १।४।१५।

विच्छेदः प्रारब्धात् १।४।१६

निष्पत्त्यवस्थापन्नस्य भक्तस्य विस्मृतजगज्जालस्य तदवस्थातो विच्छेदः व्युत्थानरूपः प्रारब्धसंस्काराद् भवति १।४।१६

अविच्छेदः प्रारब्धव्यपगमात् ... १।४।१७

प्रारब्धक्षये तदवस्थाया अविच्छेदः व्युत्थानाभावात् १।४।१७

इतितपस्समाध्युपलब्धसकलशास्त्रस्वातन्त्र्यश्रीमत्सत्यनारायण शर्म्मविरचितभक्तिसूत्रस्य श्रीसूत्रकारशुश्रूषुनैष्ठिक ब्रह्म-चारिगुर्वनुग्रहलब्धविज्ञानश्रीबलभद्रदासकृतश्रुत-प्रकाशिकाख्यवृत्तिसहितस्य प्रथमाध्या-यस्य चतुर्थः पादः समाप्तः।

अथ द्वितीयाध्यायस्य प्रथमपादः प्रारम्भः।

जीवात्मपरमात्मनोः सेव्यसेवकभावो द्वैतम् २।१।१

"द्वैतप्रसवा" १।१।१३ इति सूत्रघटकद्वैतपदं व्याचक्षते—जीवा-त्मेत्यादिना। जीवात्मनिष्ठसेवकतानिरूपितपरमात्मनिष्ठसेव्यत्वं-द्वैतम् २।१।१

तद्धि प्रवर्त्तकम्भक्तेः ... ... २।१।२

द्वैतमेव भक्तेः प्रवर्तकम्। सूत्रेऽवधार्थको हि शब्दः २।१।२

जीवात्मरमात्मनोरैक्यमद्वैतम् ... २।१।३

"अद्वैतप्रसवा" ।१।१।१४। इति सूत्रघटकाद्वैतशब्दो व्याचक्षते—जीवात्मेत्यादिना। जीवात्मनः स्वरूपविस्मृतिपूर्वकपरमात्मरूप भक्तिरसाऽपारवारिधौ निमज्जनमैक्यं तदेवाऽद्वैतं द्वितीयस्य भानाभावात् ।२।१।३।

सरित्समुद्रादिवत् ... . २।१।४

यथा समुद्रं गतवती सरित् स्वरूपं विहाय समुद्ररूपतां भजते। तथैव जीवोऽपि भक्तिरसात्मकभगवद्रूपतां प्राप्नोति २।१।४

नाद्वैतहानिः प्रकृतेः शक्तिशक्तयोरभेदात् २।१।५

जीवात्मपरमात्मनोरैक्यसिद्धावपि प्रकृतिसत्त्वेन द्वैतप्रसक्तिर्ना शङ्कनीया। चन्द्रचन्द्रिकयोरिव वह्निदाहिकयोरिव अविनाभाविनोः शक्तिशक्तिमतोरभेदप्रसिद्धेः २।१।५

सा कर्मणि प्रवर्त्तते निवर्त्तते च नैष्कर्म्ये .... २।१।६

कर्म्मानुगा प्रकृतिः प्रारब्धादिकर्म्मसत्तायाम् प्रवर्त्तमाना भवति । यतो जीवः प्रवर्त्तते नैष्कर्म्ये प्रकृतिनिवृत्त्या जीवनिवृत्तिर्निष्पद्यते २।१।६

क्रियमाणाऽश्लेषो निरभिमानेन भगवत्समर्पणात् २।१।७

कर्त्ता कारयिता भगवानेव इत्यनभिमानेन विद्यमानशरीरसम्पादितक्रियमाणकर्म्मणां स्नानदानहवनादीनां भगवति समर्पणात् भक्तस्तेनाऽसम्बद्धो भवति २।१।७

अखिलात्मभगवद्दर्शनात् संचितनिर्हारः स्मरणातात् ... ... २।१।८

अखिलचिदचिद्रूपनीरूपभगवज्ज्ञानात् सञ्चितकर्म क्षीणं भवति स्मृतेस्तथात्वप्रतिपादनात् २।१।८

निर्दग्धबीजाशयत्वञ्चाऽपि .... २।१।६

सति ज्ञाने जगदङ्कुरबीजरूपा वासना अङ्कुरानुत्पादकनिर्दग्धबीजवत् जगदङ्कुरोत्पादनाय न क्षमते २।१।९

हृद्ग्रन्थिभेदश्च .... २।१।१०

वासनायामतिदुर्बलायामहङ्कारवेतालो निवर्त्तते । चकारात् रागद्वेषादयः संग्राह्याः २।१।१०

प्रारब्धव्यपगमो भोगात् ... ... २।१।११

प्रारब्धं क्षीयते भोगात् २।१।११

निस्तारः प्रकृतेर्भगवत्प्रपत्तेश्चापि ... २।१।१२

भगवत्प्रपन्नानां भक्तानां कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थस्य भगवतः करुणापाङ्गावलोकनात् प्रकृतेर्निस्तारो भवति २।१।१२

ततोऽपवर्गः .... २।१।१३

प्रकृतिसंतरणात् मोक्षः सम्पद्यते २।१।१३

हेयः सङ्गो दुर्जनानाम् .... २।१।१४

पुनः साधनं दर्शयति-हेय इति। दुर्जनानां संसर्गः त्याज्यः२।१।१४

विक्षेपादियोनित्वात् कामादिजननात ... २।१।१५

दुर्जनसंसर्गः साधनप्रतिकूलकामादीन् जनयित्वा विषयोन्मुखतां निष्पाद्य निसिद्धाचरणे प्रवर्त्तयति । ततः स त्याज्यः इति अव्यवहितपूर्वोक्तसूत्रादनुवर्त्तनीयम् २।१।१५

सच्चारित्र्यमुपादेयं भूतरक्षणपरकलत्राऽवीक्षण-पवित्रभक्षणप्रमुखम् ... ... २।१।१६

हेयं प्रदर्श्य उपादेयं प्रदर्शयति—सच्चारित्र्येत्यादि । भूतरक्षण परकलत्राऽवीक्षणपवित्रभक्षणादिरूपं सज्जनानां चारित्र्यं ग्राह्यम् २।१।१६

सत्त्वं सेवनीयं भक्त्यर्थत्वात्सुखादिसाधकत्वाच्चापि ... ... ।२।१।१७

भगवद्भक्तिनिमित्तकत्वेन सत्त्वस्य सेवनीयत्वं सुखसाधकत्वेन ज्ञानसाधकत्वेन चापि २।१।१७

रजस्तमसी विजेतव्ये बन्धनहेतुत्वात् .... २।१।१८

बन्धनस्य हेतुत्वात् रजस्तमसी विजेतव्ये २।१।१८

मोहनप्रमदनरञ्जनादित्वाच्चापि .... २।१।१९

मोहस्य प्रमादस्य रागस्य च जनकत्वात् रजस्तमसी विजेतव्ये २।१।१९

परस्परोपमर्दकत्वात् ... . २।१।२०

सत्त्वेन रजस्तमसी विजेतव्ये तेषां परस्परोपमर्दकत्वात् २।१।२०

हन्याद्रजस्तमसी वृद्ध्या सत्त्वस्य .... २।१।२१

सत्त्वगुणस्य वृद्ध्या रजोगुणतमोगुणौ हन्तव्यौ साधकैरिति शेषः २।१।२१

सत्त्वञ्च दयादिवृत्त्यात्मकं तेनैवोपशमस्वरूपेण २।१।२२

दयादिस्पन्दनात्मकं सत्त्वं च शान्तिस्वरूपेण सत्त्वेनैव जेतव्यम् २।१।२२

आगमाम्बुजनदेशकालकर्मदीक्षाध्यान मन्त्रसंस्कारा गुणहेतवः ... २।१।२३

सत्वरजस्तमसां वृद्धेः कारणानि सात्त्विकराजसतामस शास्त्राम्बु जनदेशकालकर्मध्यानमन्त्रसंस्कारा उच्यन्ते २।१।२३

तेषां सात्त्विकं प्रशस्तं गर्हितं तामसमुपेक्ष्यं राजसञ्च .... २।१।२४

पूर्वसूत्रोक्तागमादीनां सात्त्विकत्वेन प्राशस्त्यं तामसत्वेन गर्हितत्वं राजसत्वेनोपेक्षितत्वं ज्ञातव्यम् २।१।२४

परिचाययतः शास्त्रव्यवहारौ मनः पूतिश्च २।१।२५

आगमादीनां सत्वादिबोधकौ शास्त्रव्यवहारौ मनसः पूतिश्च परिचायको ज्ञेयः २।१।२५

भक्त्या गुणानत्येति ... ... २।१।२६

भक्तः भगवद्भक्त्या गुणान् अतिक्राम्यति २।१।२६

निर्गुणात्मा भवति ... . २।१।२७

ततो भक्तो निर्गुणात्मा भवति २।१।२७

गुणात्मिका लीयते प्रकृतिः ... २।१।२८

त्रिगुणात्मिका प्रकृतिः लीयते परमात्मनीतिशेषः। भगवद्रूपापन्ना भवतीत्यर्थः २।१।२८।

संसारापद उद्धारः ... २।१।२९

पूर्वसूत्रोक्तागमादीनां सात्त्विकत्वेन प्रकृतेः लीनत्वे संसाररूपापद उद्धारो भवति भक्तानामिति शेषः २।१।२९

शान्तिसुखमूर्तिस्वस्वरूपे विश्रान्तिः २।१।३०

आपदुद्धारानन्तरं शान्तिसुखमूर्त्तौ स्वस्वरूपे विश्रान्तिर्भवति भक्तानामिति शेषः २।१।३०

पश्यति स्वस्थोऽनन्तान् सञ्चरप्रतिसञ्चरान् २।१।३१

स्वस्वरूपस्थो भक्तः अनन्तान् सञ्चरप्रतिसञ्चरान् सृष्टिप्रलयान् पश्यति २।१।३१

इतितपस्समाधिसमुपलब्धसमस्तशास्त्रस्वातन्त्र्यश्रीमत्सत्यनाराय-
णशर्म्मकृतभक्तिसूत्रस्य श्रीसूत्रकारशुश्रूषुनैष्ठिकब्रह्मचारिगुर्व-
नुग्रहलब्धविज्ञानश्रीबलभद्रदासकृतश्रुतप्रकाशिकाख्यवृत्ति-
सहितस्य द्वितीयध्यायस्य प्रथमपादः समाप्तः

अथ द्वितीयाध्यायस्य द्वितीयपादः प्रारम्भः ।

भक्तिर्द्विधा क्रियात्मिका अक्रियात्मिका चेति २।२।१

क्रियारूपाऽक्रियारूपभेदेन भक्तिर्द्विविधा भवति २।२।१

क्रियात्मिका श्रवणादिरूपा नवधा गौणी २।२।२

श्रवण-कीर्त्तन-स्मरण-पादसेवार्चन-वन्दन-दास्य-सख्यात्मनिवेदन-रूपा नवधा क्रियात्मिका भक्तिः कायिकवाचिकमानसिकवृत्तिरूपत्वेन साधननाम्नी गौणी भवति २।२।२

एकैवाऽक्रियात्मिका प्रेमसमुद्रेकस्वरूपा मुख्या २।२।३

प्रेमसमुद्रेकस्वरूपा अक्रियात्मिका मुख्या भक्तिरेकैव भवति २।२।३

अक्रियात्मकत्वं तस्याः क्रियाराहित्याद-विधिशेषत्वाच्च यथा ज्ञानस्य ... २।२।४

सा मुख्या भक्तिः स्वस्यां क्रियासत्त्वाऽनुपस्थितेः ज्ञानवत् अविधिशेषत्वाच्च अक्रियात्मिका भवति २।२।४।

परमानन्दस्वरूपप्रेमाभिन्नपरमात्मैकगो-चरत्वादसम्प्रज्ञात इव ... २।२।५

मुख्यायां भक्तौ परमानन्दस्वरूपप्रेमाऽभिन्न एको निर्विशेषः परमात्मा एवाखण्डात्मकत्वेन प्रकाशमानं भवति २।२।५

विधिनिषेधराहित्यं नैर्गुण्ये तथाभ्युपगमात् २।२।६

निर्गुणोभक्तः विधिनिषेधैरपरामृष्टो भवति । तथा शास्त्रं स्वीकरोति २।२।६

आनृण्यञ्च ... ... २।२।७

निर्गुणो भक्तः देवादीनामृणैरनृणो भवति २।२७

आवश्यकमानिष्पत्तेः ... २।२।८

परायां भक्तेर्निष्पत्तिपर्य्यन्तं नियतं कर्माऽनुष्ठेयम २।२।८

अनावश्यकमपि सात्त्विकं कामनारहितम् २।२।९

अनियतमपि कामनामनपेक्ष्य सेकामं सात्त्विकं कर्मानुष्ठेयम् २।२।९

२८

पावित्र्यमकामे ... ... २।२।१०

सकामेऽपि कर्मणि कामनामनपेक्ष्य अनुष्ठिते सति सत्त्वशोधनरूप-पावित्र्यं भवति २।२।१०

कामे बन्धनम् ... ... २।२।११

सकामकर्म्मणः फलानुसन्धिसत्त्वे बन्धनम्भवति २।२।११

इति तपस्समाधिसमुपलब्धसकलशास्त्रस्वातन्त्र्यश्रीमत्सत्यनारायणशर्म्मकृतभक्तिसूत्रस्य श्रीसूत्रकारशुश्रूषुनैष्ठिकब्रह्मचारिगुर्वनुग्रहलब्धविज्ञानश्रीबलभद्रदासकृतश्रुत-प्रकाशिकाख्यवृत्तिसहितस्य द्वितीयाध्यायस्य द्वितीयपादः समाप्तः ।

अथ द्वितीयाध्यास्य तृतीयः पादः प्रारम्भः ।

व्यवहारापसरणं स्मरणादिभिर्मनसोऽनवकाश-लयाभ्याम् ... ... २।३।१

भक्तेर्लौकिकव्यवहारो भगवच्चिन्तने प्रेमप्रवाहे च मनसः प्रतिष्ठानात् लयाच्च अन्यत्राऽनवकाशात् परिहर्त्तव्यः २।३।१।

कीर्त्तनादिभिर्वचसः ... ... २।३।२

लौकिकव्यवहारः भगवद्गुणानुवादादौ वचःप्रतिष्ठानादन्यत्रानवकाशात् परिहर्त्तव्यः २।३।२

परिचर्य्यापूजादिभिर्वपुषः ... ... २।३।३

लौकिकव्यवहारः भगवत्परिचर्य्यापूजादौ वपुःप्रतिष्ठानादन्यत्रानवकाशात् परिहर्त्तव्यः २।३।३

नार्थः कृत्यकृतिभ्यां दार्ढ्ये ... ... २।३।४

भक्तेर्दार्ढ्ये सति भक्तानां कृताकृताभ्यां न किञ्चित्प्रयोजनं वर्त्तते २।३।४

शरीरयात्रा यदृच्छालाभेन ... ... २।३।५

दैवात्प्राप्तेनान्नादिना भक्तानां शरीरनिर्वाहो जायते २।३।५

आचाराणामनैयत्यमनासक्तेः प्रवाहपतिता नाम् ... ... २।३।६

वर्त्तमानकालिकप्रवाहाऽऽकृष्टानामाचाराणामासक्त्यभावादनैयत्यम् समयदेशादिक्रमाननुरोधात् २।३।६

नैयत्यं वा लोकसङ्ग्रहार्थसहजकारुण्यात् ... २।३।७

परभक्तिसम्पन्नभक्तः स्वाभाविकानुकम्पापरीतः लोका अपि एवं कुर्य्युरिति नियमेन नियतं कर्म्माऽऽचरति २।३।७

प्रकृत्यसंश्लिष्टभावः ... ... २।३।८

परभक्तिसम्पन्नानां भक्तानां प्रकृत्याऽसंश्लिष्टत्वं भवति। प्रकृतिजन्यैस्त्रिगुणविकारैर्न लिप्यत इतिस्पष्टार्थः २।३।८

स्वस्मिन् कृतकृत्यता च ... ... २।३।९

भगवदाराधनेन भगवद्भावापन्ने स्वस्वरूपे कृतकृत्यता चोत्पद्यते २।३।९

सर्वत्र भगवद्भावः ... ... २।३।१०

अहरहोभगवदाराधनेन भगवद्भावापन्नया बुध्यै सर्वेषु पदार्थेषु भगवत्ता प्रतीतिर्भवति भक्तानाम् २।३।१०

आत्मन्यपि ... २।३।११

स्वात्मन्यपि भगवत्ताप्रतीतिर्भवति २।३।११

सर्वात्मैक्यम् ... ... २।३।१२

ततः सर्वैः पदार्थैः साकम् आत्मन ऐक्यादैक्यबुद्धिरुत्पद्यते सर्वत्र २।३।१२

अद्वैतप्रतिष्ठा ... २।३।१३

सा बुद्धिः अद्वैतप्रतिष्ठा अद्वैते सर्वत्र समानसत्तया संस्थिते चिद्रूपे प्रतिष्ठा स्थितिर्यस्याः सा भवति।

व्यवहारवत्त्वमयथापूर्वं शिशुरञ्जनार्थमनासक्त्या वृद्धक्रीडनवत् ... २।३।१४

क्रीडनेष्वसक्तानां वृद्धानां शिशुरञ्जनार्थं क्रीडावत् सर्वैः लौकिकवैदिकव्यवहारा निर्वहन्ति अद्वैते प्रतिष्ठां गतवतां भक्तानाम् २।३।१४

लीला कैवल्यमीश्वरवच्च ... २।३।१५

यथा केवलं लीलामात्रार्थं भगवतः समस्तसंसाररचनात्मकं कार्य्यजातं भवति । तथैव भक्तानामपि लौकिकव्यवहारस्तयोरेकत्वापत्तेः २।३।१५

साम्राज्यभाज इव स्वातन्त्र्यम् ... २।३।१६

यथा सम्राड् न कमप्यपेक्षते स्वातन्त्र्येण सर्वकार्य्यजातं सम्पादयति तथाऽयमपि भक्तः २।३।१६

अदर्शनं सिद्धेरनभिलाषात् ... २।३।१७

भक्तानां सिद्धेरभिलाषाभावात्तददर्शनम् २।३।१७

क्वचित्कदाचिच्च संयोगात् ... २।३।१८

क्वचित्कदाचिद्दैवसंयोगात् भक्तानां सिद्धिर्दृश्यते लोकैः२।३।१८

त्राणं भगवताऽऽपत्तेर्यथाम्बरीषादीनाम् ... २।३।१९

भगवच्छरणापन्नानां भक्तानां भगवताऽऽपत्तेस्त्राणं क्रियते यथाऽम्बरीषप्रह्लादसुदर्शनादीनाम् २।३।१९

सामर्थ्यमद्भुतं यथाऽङ्घ्र्युत्थापनेऽङ्गदीयम् २।३।२०

यथा लङ्कायां चरणोत्थापने अङ्गदस्य दर्शितं तथा भक्तानामद्भुतसामर्थ्यं भवति २।३।२०

विद्यापतेरुपगमने गङ्गायाश्चन्द्रोदये च मदनस्य ... ... २।३।२१

गङ्गां प्रस्थितस्य विद्यापतेः जाह्नवीप्रवाहोपगमनम् । अमायां मदनस्य चन्द्रोदयनम् । भक्ताद्भुतसामर्थ्योदाहरणे वेदितव्ये २।३।२१

ध्यानयजनपरिचर्य्याः कृतत्रेताद्वापरेषु साधनानि यथासङ्ख्यम् ... ... २।३।२२

सत्यत्रेताद्वापरयुगेषु ध्यानयजनपरिचर्य्याः भक्तेः साधनानि ज्ञातव्यानि क्रमशः २।३।२२

कीर्त्तनञ्च कलौ स्मरणात् ... २।३।२३

कलियुगे हरिकीर्त्तनं भक्तेः साधनम् ज्ञातव्यम् २।३।२३

क्रमव्यत्यासोऽपि दर्शनात् ... २।३।२४

सत्यत्रेताद्वापरकलियुगीयानां भगवद्भक्तिसाधनानां क्रमस्य व्यत्यासोऽपि पुराणादौ दृश्यते २।३।२४

यथाऽजामिलवाल्मीकिशवर्य्यादीनाम् ... २।३।२५

कलीतरयुगेषु अजामिलप्रभृतीनाम् हरिकीर्त्तनादेव परभक्तिप्राप्तिः लोके श्रूयते पुराणादौ दृश्यतेच २।३।२५

कीर्त्तनादशुद्धिक्षयः ... ... २।३।२६

हरिकीर्त्तनादन्तर्मलस्यापगमो भवति २।३।२६

ततः सङ्गानुदयः २।३।२७

अन्तर्मलस्यापगमान्तरम् कर्म्मणि कर्त्तृत्वाभिमानोदयो न भवति विषयाऽऽसक्तिर्निवर्त्तते २।३।२७

ततः परप्राप्तिः स्मरणात् ... २।३।२८

असङ्गप्रतिष्ठायां परमं पदं प्राप्यते तथा स्मर्य्यते २।३।२८

प्रणतिरपि कल्याणी महती तथा स्मरणात् २।३।२९

भक्तेन कृता भगवत्प्रणतिः परमकल्याणदायिनी भवति तथा स्मर्य्यते २।३।२९

वैरभावेनापि यथाचैद्यादीनाम् ... २।३।३०

वैरभावेनाऽपिस्मृतिः भगवत्प्रापिका भवति। यथा चैद्यादयो वैरभावेन भगवन्तं स्मरन्तो भगवत्त्वमुपगताः २।३।३०

जारबुद्ध्याऽपि यथा वल्लवीनाम् ... २।३।३१

जारबुद्ध्या स्मृतिः भगवन्तं प्रापयति। यथा गोप्यो भगवन्तं प्राप्ताः २।३।३१

कथञ्चिदपि तत्र निरन्तरनिवेशनं मनसः कल्याणाय ... . २।३।३२

येन केन प्रकारेण निरन्तरं भगवति निवेशितं मनः कल्याणं जनयति २।३।३२

इति तपस्समाधिसमुपलब्धसमस्तशास्त्रस्वातन्त्र्यश्रीमत्सत्यनारायण-शर्मकृतभक्तिसूत्रस्य श्रीसूत्रकारशुश्रूषुनैष्ठिकब्रह्मचारिगुर्वनुग्रहलब्धविज्ञानश्रीबलभद्रदासकृतश्रुतप्रकाशिकाख्यवृत्तिसहितस्य द्वितीयाध्यायस्य तृतीयपादः समाप्तः।

अथ द्वितीयाध्यायस्य चतुर्थपादारम्भः

प्रतियुगं निर्गुणात्मनो मायाऽधिष्ठानस्याऽपाञ्च-भौतिकसगुणशरीराविर्भावोऽवतारः .... २।४।१

प्रतियुगं निर्गुणात्म मायाशवलितं ब्रह्म धर्म्मग्लानौ अधर्म्माभ्युत्थाने मायामधिकृत्य अपाञ्चभौतिकसगुणशरीरेण भगवता आविर्भूयते। तस्यैवावतारशब्देन प्रसिद्धिः २।४।१

स हि सदवनाऽसदुदमनधर्म्मसंस्थापनार्थ-स्तथास्मरणात् ... ... २।४।२

सोऽयमवतारः सतां रक्षणाय असतां निग्रहाय धर्म्मसंस्थापनाय भवति तथा स्मर्य्यते २।४।२

प्रसिद्धा रामादयो दशैश्वर्य्यवन्तोऽवताराः २।४।३

प्रसिद्धा दशमहाविद्या अपि तत्तत्स्वरूपा तथा स्मरणात् ... ... २।४।४

कालीतारेत्यादि दशमहाविद्या प्रसिद्धाः सन्ति। तत्तद्रामाद्यवतारस्वरूपाः "रामरूपा भवेत्तारा कृष्णस्तु कालिका स्वयम्" इत्यादिस्मृतिः प्रमापयत्येतमभेदम् २।४।४

ते ता अपि भजनीयाः कल्याणाय ... २।४।५

ते रामादयस्ताः कालिकादयश्च भजनीयाः निःश्रेयसप्राप्तये २।४।५

भजनीयत्वमप्यन्यासां शक्तीनां विहिताचरणैः २।४।६

दशविद्येतर अपि शक्तयः विधिबोधिताचरणैः रुपासनीयाः २।४।६

शक्तिमदभेदावगमात् ... ... २।४।७

तेषां तासाञ्च शक्तिमतां शक्तीनाञ्च अभेदस्वीकारान्नास्त्यत्र शङ्कावसरः २।२।७

रुचिवैचित्र्याद्भजनवैचित्र्यम् ... २।४।८

स्वभावसञ्जातरुचिवैचित्र्याद्भजनवैचित्र्यम्भवति येषां यत्र रुचिस्तत्तद्भजनं विधेयम् रुचिप्रतिरोधे परमार्थफलाभावप्रसङ्गात् २।४।८

सर्वैकात्म्यात् कैवल्यम् ... ... २।४।६

सर्वत्र देवदेवीषु एकात्म्यबुद्ध्या कैवल्यम्भवति २।४।६

तत्तत्सालोक्याद्यनैकात्म्यात् ... २।४।१०

एकात्मबुद्ध्यभावात् भक्तानां तत्तत्सालोक्याद्यभिधाना मुक्तिर्भवति २।४।१०

श्रवणश्रावणाभ्यामभिरमणम् परस्परम् २।४।११

भक्तानामन्योऽन्यम् उपास्यसम्बन्धिश्रवणश्रावणाभ्यामभिरमणम्भवति २।४।११

ततः पावित्र्यं परमम् ... ... २।४।१२

तस्मादभिरमणात् विषयविरक्त्यनुकूलमनःशोधनरूपपरमाशुद्धिर्भवति २।४।१२

गायनञ्च गुणानां परस्परं स्वयं वा भगवत्तोषाय प्रेमरसोदयाय प्रसादाय मनसश्च ... २।४।१३

भक्तैर्भगवद्गुणानां गानञ्च परस्परं स्वयं वा भगवन्तं संतोषयति प्रेमरसमुदाययति मनः प्रसादयति २।४।१३

वार्त्ता च तद्विषयिणी प्रवर्त्तयति भक्तौ निवर्त्तयति विषयेभ्यः ... ... २।४।१४

भगवद्विषयिणी वार्त्ता च भक्तं भक्तौ प्रवर्त्तयति विषयेभ्यो निवर्त्तयति २।४।१४

प्राशस्त्यं समर्चायाः परभक्तिनिमित्तत्वात् २।४।१५

भगवत्समर्चना प्रशस्यते यतः सा परां भक्तिमुत्पादयति ।२।४।१५।

तीर्थाभिगमनसेवनदानव्रतादिसात्त्विक-
प्रवृत्तयः कल्याणाय निष्कामाः ... २।४।१६

कामनारहिततीर्थाभिगमनतीर्थसेवनहिरण्यादिदानैकादश्यादिव्रतरूपाः सात्त्विकप्रवृत्तयो मनःशोधनहेतुत्वात् परम्परया मोक्षे कारणानि भवन्ति ।२।४।१७।

रुचिपरिपाकोऽध्ययनाज्जपाच्च पवित्राणाम् २।४।१७

ज्ञानवर्द्धकभक्तिप्रवर्त्तकगीतादिपवित्रशास्त्राणामध्ययनात् रामतारकादिपवित्रमन्त्राणां जपात् भक्तानां रुचिः परिपक्वा भवति ।२।४।१७।

परमार्थविचारोऽप्राकृता ऽऽचारश्च ... २।४।१८

अव्यवहितपूर्वोक्तसूत्राचरणात् परमार्थविचारः प्राकृतजनविलक्षणोऽप्राकृताऽऽचारश्च भवतः ।२।४।१८।

सुखमयप्रेमदर्शनमकस्मादचिरस्थायिविद्युद्वत् २।४।१९

पूर्वोक्ताऽऽचारसम्पन्नानां भक्तानामकस्माद् विद्युद्वदचिरस्थायि सुखमयप्रेमदर्शनं भवति ।२।४।१९।

मुहुर्मुहुर्दिदृक्षा औत्कण्ठ्यं स्थैर्य्यसम्पत्त्यै च२।४।२०

भक्तानां मुहुर्मुहुः तत्प्रेमदिदृक्षा भवति तत्प्रेमस्थैर्य्यसम्पत्त्यै उत्कण्ठा च भवति ।२।४।२०

ततः साधनप्रवृत्तिर्यथाशास्त्रं यथाक्रमम् ... २।४।२१

ततो भक्तानां तद्दनिर्वचनीयसुखलाभात् शास्त्रानुसारेण क्रमानुसारेण च साधनेषु अतिशयेन प्रवृत्तिर्भवति ।२।४।२१।

ततस्तत्सम्पत्तिः कारुण्या करुणासमुद्रस्य २।४।२२

तदनन्तरं करुणासमुद्रस्य श्रीमद्भगवतः निष्कारणकरुणया पूर्वोक्ताऽचिरस्थायिप्रेम्णः चिरस्थितिरूपा सम्पत्तिर्भवति २।४।२२

सैव पराभक्तिः सैव पराभक्तिः सैव संसिद्धिः सैव संसिद्धिः ... ... २।४।२३

श्रीमद्ग्रन्थकारः भक्तेषु भक्तिसमास्थादाढर्याय चिरस्थितिरूपां प्रेमसम्पत्तिं पौनःपुन्येन कीर्त्तयति—सैव सम्पत्तिः विदेहदशायां विदेहमुक्तिः कथ्यते॥२।४।२३।

इति तपस्समाधिसमुपलब्धसमस्तशास्त्रस्वातन्त्र्यश्रीमत्सत्यनारायण शर्मविरचितभक्तिसूत्रस्य श्रीसूत्रकारशुश्रूषुनैष्ठिकब्रह्मचारिगुर्वनुग्रहलब्धविज्ञानश्रीवलभद्रदासशर्मकृतश्रुतप्रकाशिकाख्यवृत्तिसहितस्य द्वितीयाध्यायस्य चतुर्थपादःसमाप्तः।

तामसीं शुद्धसत्वां च मायामादाय जगत उपादानभूतोपि निमित्तभूत ईश्वरः ३।१।१

तामसीमायाऽऽश्रयणेन शुद्धसत्त्वात्मकमायाश्रयणेन च जगत उपादानकारणं निमित्तकारणञ्च ईश्वरो भवति।३।१।१।

सर्वरूपः सर्वान्तर्बहिरवभासमानः सर्वाधिपतिः ... ... ३।१।२

एतत्सूत्रोक्तविशेषणविशिष्ट ईश्वरो ज्ञातव्यः३।१।२

स एव श्रुतिसम्मतं मायाशबलितं ब्रह्म ३।१।३

तस्यैवेश्वरस्य मयाशवलितब्रह्मेति श्रुतिसम्मता संज्ञा ३ १।३

कार्य्यब्रह्माऽपि त्रिविधम् ब्रह्मविष्णुशिवाऽभिधम् त्रिगुणभेदात् ... ... ३।१।४

रजोगुणविशिष्टः ब्रह्मा सत्त्वगुणविशिष्टः विष्णुः तमोगुणविशिष्टः शिवश्च कार्य्यब्रह्मशब्देन व्यपदिश्यन्ते ३।१।४

ईश्वरत्वमेतेषां सृष्टिरक्षणसंहारसामर्थ्यात् क्लेशादिभिरपरामर्शादप्रतिमप्रभावाच्च ३।१।५

सृष्टिरक्षणसंहारसामर्थ्यक्लेशाद्यपरामर्शाप्रतिमप्रभावप्रयुक्त एतेषामीश्वरत्वसिद्धिः ३।१।५

श्रवणस्मरणाभ्यामपि ... ... ३।१।६

श्रुतिस्मृतिभ्यामपि एतेषामीश्वरत्वमुच्यते ३।१।६

क्वचित्परामर्शस्तु लीलामात्रम् ... ३।१।७

तेषां क्वचित्क्लेशादिपरामर्शदर्शनन्तु लीलामात्रम् ३।१।७

हैरण्यगर्भा उपासते हिरण्यगर्भम् वैष्णवा विष्णुं शिवं शैवाश्च ... ... ३।१।८

ब्रह्मविष्णुशिवोपासका ईश्वरबुद्ध्या ब्रह्मविष्णुशिवानुपासते ३।१।८।

व्यूढाश्च वासुदेवम् ... ... ३।१।९

व्यूहोपासका वासुदेवमुपासते ३।१।९

नारसिंहादयो नरसिंहादींश्च ३।१।१०

नरसिंहाद्युपासका नरसिंहादीनवताररूपानुपासते ३।१।१०

महत्त्वं गणपत्यादीनां तत्तदंशकत्वात् ३।१।११

गणपत्यादीनामपि महत्त्वं भवति ।तत्तत्कार्य्यब्रह्मांशभूतत्वात् ततस्तेप्युपास्यन्ते ३।१।११

इन्द्रादीनाञ्च सत्त्वप्राधान्यात् ... ३।१।१२

इन्द्रादयोऽपि देवाः सत्त्वाधिक्यान्महत्त्वसम्पन्ना उपास्या भवन्ति ३।१।१२

तत्तदुपासकानां तत्तत्समापत्तिरितरकामनापूर्त्तिश्च ... ... ३।१।१३

गणपत्यादीन्द्राद्युपासकानां मरणानन्तरम तत्तत्प्राप्तिर्भवति। जीवद्दशायां तदीतरकामनापूर्त्तिर्भवति ३।१।१३

कार्य्यब्रह्मसु साक्षादमृतत्वं विष्णोः सत्त्वोत्कर्षात् ... ... ३।१।१४

ब्रह्मविष्णुशिवरूपकार्य्यब्रह्मसु साक्षान्मोक्षः विष्णोरेव भवति तस्य सत्त्वोत्कर्षात् ३।१।१४

ताभ्यामपि परम्परया क्रमाद्वा … ३।१।१५

ब्रह्ममहेश्वराभ्यामपि परम्परया क्रमाद्वा अमृतत्वं लभ्यते ३।१।१५

अङ्गद्वयञ्च बहिरन्तर्भेदात् … ३।१।१६

परभक्तेर्बाह्याभ्यन्तर्भेदादङ्गद्वयं वर्त्तते । चकारो भक्तीतरप्रकार-व्यावर्त्तकः ३।१।१६

श्रवणकीर्त्तनसपर्य्यादिकायिकवाचनिकव्या-पारो बहिरङ्गम् … … … ३।१।१७

कायसम्पाद्यवचनसम्पाद्यश्रवणकीर्त्तनपादसेवनार्चनवन्दनदास्य रूपव्यापारः परभक्तेर्बहिरङ्गं स्यात् ३।१।१७

स्मरणसख्यात्मनिवेदनरूपमानसव्यापारोऽन्तरङ्गम् … … … ३।१।१८

भगवत उत्तमश्लोकस्य तत्तत्समयसम्पादितजगत्पावनचरितानां तदीयमनोरमरूपस्य च चिन्तनम् स्मरणम् । तेन सह समताख्यातिः सख्यम् । अहङ्काररहित्ये तस्मिन्नात्मसमर्पणम् आत्मनिवेदनम् एतत्त्रितयरूपमानसव्यापारः परभक्तेरन्तरङ्गं स्यात् ३।१।१८

स्मरणं द्विविधम् … … … ३।१।१९

स्मरणस्य द्वेधा प्रकारो भवति ३।१।१९

स्मरणीयाऽऽकृतिसत्तायामाकृतिप्रतिष्ठम् ३।१।२०

स्मरणीयस्य भगवतः आकारवत्त्वे सति स्मरणम् तदाकाराऽऽश्रितं भवति एतत् प्रकारः प्रथमः ३।१।२०

तदसत्तायाञ्च तदनुभावप्रकरभावना शरीरम् … … … ३।१।२१

स्मरणीयस्य भगवतः आकाराऽसत्त्वे तस्य प्रभावलक्षितमहिमसमुदायस्य भावना निरुक्तस्मरणस्य रूपम्भवति एतत्प्रकारो द्वितीयः ३।१।२१

तच्च पुनर्द्विविधम् प्रेमसंश्लेषविश्लेष-भेदात् ... ... ३।१।२२

तत्स्मरणजप्रेमसंयोगवियोगाभ्यां द्विप्रकारकं भवति ।३।१।२२।

परभक्तिकुद्दिप्रविष्टं संश्लिष्टं विश्लिष्ट-मप्रविष्टम् ... ... ३।१।२३

प्रेमसहितस्मरणं परभक्तिकुक्षौ प्रविशति प्रेमरहितस्मरण-ञ्च तत्र न प्रविशति ।३।१।२३।

संश्लिष्टात्प्रेमकल्लोलः ... ... ३।१।२४

प्रेमसंश्लिष्टस्मरणात् वारं वारं तरङ्ग इव प्रेमाविर्भावो भवति ३।१।२४।

सत्त्वसंजातप्रेमप्रकाशेऽञ्जसाऽऽकृतिदर्शनम् स्वप्न इव ... ... ३।१।२५

सत्त्वजनितप्रेम्णः प्रकाशे सति अनायासात् स्मरणीयभगवतः आकृतिर्दृश्यते स्वप्ने चिन्ताजन्याकारदर्शनमिव ३।१।२५

अन्यथा दुष्करत्वम् ... ... ३।१।२६

प्रेमोदयाभावे आकृतिदर्शनस्य दुष्करत्वम् भवति ।३।१।२६।

युगपत् सर्वावयवदर्शनाऽसम्भवो वा निर्बन्धात् ... ... ३।१।२७

हठात् एककालावच्छेदेन सर्वाऽवयवदर्शनस्य असम्भवो वा भवति ।

अन्तरङ्गप्रतिष्ठायामनपेक्षितं बहिरङ्गम् ३।१।२८

स्मरणाद्यतरङ्गसम्पत्तौ श्रवणादिबहिरङ्गमनपेक्षितं भवति ३।१।२८।

अनुष्ठानमप्यनियतं पूर्वसंस्कारात् ... ३।१।२९

पूर्वसंस्कारप्रयुक्तबहिरङ्गान्तरङ्गानुष्ठानमपि कालाद्यनैयत्येन भवति ।३।१।२९।

नापि वाऽनुदयाज्जयाद्वा संस्कारस्य ३।१।३०

संस्कारस्यानुदयात् जयाद्वा केषाञ्चित्पुण्यपुञ्जोदयेन निरुक्तानुष्ठानाऽभावोऽपि भवति ।३।१।३०।

ईक्षते बहुत्वाय ... ... ३।१।३१

एकः सन्मात्रस्वरूप ईश्वरः प्रलयकालावसाने नानाप्रपञ्चविस्ताराय ईक्षते ।३।१।३१।

सृजति प्रविशति चेतयति प्रवर्त्तयति मोक्षाय ... ... ३।१।३२

ईश्वरः जगत् सृजति तत्र प्रविशति तच्चैतन्यापन्नं करोति जीवयति मोक्षाय प्रवर्त्तयति । ३।१।३२।

मोक्षयति पात्रं दण्डयत्यपात्रं शुद्धयै ३।१।३३

कृतिनं जनं संसारादुद्धारयति पापिनं पापनिवृत्यै दण्डयति ।३।१।३४।

स्वयमवतरति वात्सल्यात्स्वतन्त्रोऽपि ३।१।३४

धर्मसंस्थापनाय सज्जनानुग्रहाय दुष्टनिग्रहाय स्वतन्त्रोऽपि स्वयमवतीर्णो भवति ।३।१।३४।

हरति भुवो भारम् ... ... ३।१।३५

दुष्टान् नाशयित्वा पृथिवीं भाररहितां करोति ३।१।३५

विहरति लोकरक्षणाय ... ... ३।१।३६

जगद्रक्षणाय लीलां करोति ३।१।३६

संग्राहयत्याचारणैः ... ... ३।१।३७

स्वयं सत्कर्मानुतिष्ठन् लोकान् सत्कर्मसु प्रवर्त्तयति ३।१।३७

ईश्वरसृष्टिरप्युपकाराय जीवानां मोक्षहेतुत्वात् स्मरणादुपपत्तेश्च ... ... ३।१।३८

ईश्वरः जीवानां मोक्षनिष्पत्तिरूपोपकाराय सृष्टिं करोति । स्मृति

रपि ईश्वरकृतसृष्टेः जीवनिरूपितमोक्षरूपोपकारकत्वम् उपपादयति ३।१।३८

प्रपञ्चकारणभूततमस्स्वरूपमायात्मनाऽव-स्थानमापन्नानाम्प्रलयम् ... ३।१।३९

प्रलयमापन्नानां जनानां प्रपञ्चहेतुभूततमस्स्वरूपमायया सह अवास्तविकतादात्म्यावस्थानम्भवति ३।१।३९

अचित्त्वमिव चिदात्मनां तत्र तमस एव सत्त्वात् .... ३।१।४०

प्रलयकाले चित्स्वरूपाणां जीवानां स्वरूपमचैतन्यमिव भवति तत्र तमस एव सत्त्वात् ३।१।४०

मोहात्मकं तदितिप्रकृत्यधिकारे .... ३।१।४१

तत्तमो मोहस्वरूपम् इति साङ्ख्यशास्त्रे प्रसिद्धम् ३।१।४१

मोक्षनिमित्तभूतकर्मक्षयहेतुभोगासम्भवस्ता-दृग्साधनासंभवश्च ... ... ३।१।४२

प्रलयकाले मोक्षोत्पादकस्य कर्मक्षयस्य हेतुभूतभोगस्य चासंभवः मोक्षनिमित्तभूतसाधनासम्भवश्च भवति ३।१।४२

तत्संभवस्सृष्टौ सत्त्वरजसोः सत्त्वात् ३।१।४३

तयोरव्यवहितपूर्वसूत्रोक्तयोः कर्म्मभोगमोक्षसाधनयोः सृष्टौ सम्भवः। तत्र सत्त्वरजोगुणयोः सत्त्वात् ३।१।४३

ज्ञापितं तयोः प्रकाशकत्वं प्रवर्त्तकत्वञ्च ३।१।४४

तयोः सत्त्वरजसोः प्रकाशकत्वं प्रवर्त्तकत्वञ्च शास्त्रे ज्ञापितं भवति ३।१।४४

मोक्ष उपयोगः सृष्टेस्तथात्वात् ... ३।१।४५

मोक्षे सृष्टेरुपयोगः प्रकाशकप्रवर्त्तकसत्त्वरजसोः साधनभोगनिमित्तयोः सृष्टिकाले विद्यमानत्वात् ३।१।४५

सिद्ध उपकारः ... ... ३।१।४६

पूर्वोक्तप्रकारेण जीवजातं प्रति ईश्वरकृत उपकार उपपन्नः ३।१।४६

परिगणना ऽसंभवो ऽनुभावानन्त्यात् ... ३।१।४७

ईश्वरमाहात्म्यस्य परिगणनाया असम्भवः, यदेतदनन्तं भवति ३।१।४७

इति तपस्समाधिसमुपलब्धसकलशास्त्रस्वातन्त्र्यश्रीमत्सत्यनारायण-
शर्म्मकृतभक्तिसूत्रस्यश्रीसूत्रकारशुश्रूषनैष्ठिकब्रह्मचारिगुर्वनुग्रह
लब्धविज्ञान श्रीबलभद्रदासशर्म्मकृत श्रुतप्रकाशिकाख्य
वृत्तिसहितस्य तृतीयाध्यायस्य प्रथमपादः समाप्तः।

अथतृतीयाऽध्यायस्य द्वितीयपादःप्रारम्भः

आदौ प्रकाशस्य भानं घनीभूतस्य सूक्ष्मस्य
बृहतो वा सत्त्वसंशुद्ध्या साधनाऽभ्यासात् ३।२।१

आकारदर्शनसमये साधनाऽभ्यासात् सत्त्वसंशुद्ध्या सूक्ष्मस्य बृहतो वा घनीभूतस्य प्रकाशस्य भानम् भवति ।३।२।१

अभानं जगज्जालस्य सकलस्य ... ३।२।२

तदा सकलस्य जगज्जालस्य अभानं भवति ।३।२।२।

तत आकारस्य दर्शनं प्रभान्तर्वर्तिनो
रुचिरस्य कृपयैव कृपासिन्धोः ... ३।२।३।

तदनन्तरम् निरुक्तप्रकाशान्तर्वर्त्ती रुचिरः आकारः कृपासिन्धोः कृपयैव दृग्गोचरो भवति ।३।२।३।

न तत्र साधनसंचारो व्यापाराभावात् ... ३।२।४

आकारदर्शनसमये कस्यापि साधनस्य सञ्चारो न भवति त्रिविधव्यापाराऽभावात् ।३।२।४।

सम्भाव्यतेऽपि प्रश्नोत्तरं कृपाबाहुल्यात् ३।२।५

प्रत्यक्षीभूतभगवतः कृपाबाहुल्यात् तेन सहप्रश्नोत्तरमपि सम्भवति ।३।२।५।

अनवकाशः प्रश्नस्य प्रेमाम्बुधिमज्जनात् ३।२।६

प्रत्यक्षसमये प्रश्नस्यावकाशो न भवति भक्तस्य प्रेमसमुद्रे निमग्नत्वात्

संभाव्यतेऽपि संस्कारयोजनाद्दैवात् ... ३।२।७

कदाचित्सुदृढमनोरथरूपपूर्वसंकल्पजन्मसंस्कारवशात् भक्तस्य भगवता सह प्रश्नोत्तरस्य सम्भावना भवति ।३।२।७।

पुनः संसारदर्शनमाप्रारब्धम् ... ३।२।८

भगवदाकारदर्शनोत्तरकालानन्तरं पुनः प्रारब्धपर्य्यन्तम् संसारदर्शनं भवति ।३।२।८।

आरब्धसमाप्तौ कैवल्यं वासनाऽनुदयात् ३।२।९

सञ्चितक्रियमाणयोर्दर्शनेनारब्धस्य भोगेन समाप्तौ सत्यां वासनानामनुदयो भवति । ततः स्वयं कैवल्यं भक्तस्य भवतीतिवेदितव्यम् ,३।२।९।

सायूज्यं वा साकारभावनादार्ढ्यात् ३।२।१०

आकारवतो भगवतो भवनायां दृढयाम्भक्तः साकारभगवत्सायुज्यं लभते ।३।२।१०।

सालोक्यादिसम्भावना तारतम्याद्भक्तेः ३।२।११

भक्तेस्तारतम्यात् वासनाऽनुगुण्यात् केषाञ्चिद्भक्तानां सालोक्यस्य सारूप्यस्य सामीप्यस्य च सम्भावना भवतीतिवेदितव्यम् ।३।२।११।

सर्वथा शान्तिर्जन्माद्ययोगात् ... ३।२।१२

सर्वासां निरुक्तानां मुक्तीनां समुपलब्धौ सदा शान्तिर्भवति भक्तानां जन्मादीनां संयोगाभावात् ।३।२।१२।

इति तपस्समाधिसमुपलब्धसकलशास्त्रस्वातन्त्र्य श्रीमत्सत्य नारायणशर्मविरचितभक्तिसूत्रस्य श्रीसूत्रकारशुश्रूषुनैष्ठिकब्रह्मचारिगुर्वनुग्रहलब्धविज्ञानश्रीवलभद्रदासशर्म्मकृतश्रुतप्रकाशिकाख्यवृत्तिसहितस्य तृतीयाध्यायस्य द्वितीयपादः समाप्तः ।

अनन्या भक्तिः　…　…　३।३।१

काचिद्भजनीयमव्यभिचरन्ती भक्तिरनन्येति कथ्यते ३।३।१

भजनीयेतराऽभजनत्वमनन्यत्वम् तन्मा-
त्रभजनत्वादित्याचार्य्याः　…　…　३।३।२

भजनीयदेवादेरन्यस्याभजनं भक्तेरनन्यत्वं तन्मात्रभजनत्वादित्याचार्य्या अभ्युपगच्छन्ति ३।३।२

यथा सम्प्रदायो वैष्णवशैवशाक्तादीनाम्　३।३।३

वैष्णवशैवशाक्तसौर्यगाणपत्यानां विष्ण्वादिषु यथा तदनन्यत्वसम्प्रदायो लोके शास्त्रे च दृश्यते ३।३।३

सर्वेऽपि भजनीयस्वरूपा एव नान्ये इत्यैक्य-
बुद्ध्या वा सर्वभजनत्वमनन्यत्वम्　…　३।३।४

विष्ण्वाद्यन्यतममदीष्टदेवतास्वरूपा एव सर्वे तदन्यदेवा न तद्भिन्ना इत्यैक्यबुद्ध्या सर्वेषां भजनत्वमनन्यत्वं भक्तेः ३।३।४

सोऽहमेवाऽस्मीति बुद्ध्या वा स्वाऽभेदेन भज-
नीयभजनत्वं चिन्तनरूपत्वमनन्यत्वम्　३।३।५

अहं स्वेष्टदेवाऽभिन्नोऽस्मीति बुद्ध्या वा स्वस्मादभेदेन चिन्तनरूपभजनीयभजनत्वं भक्तेरनन्यत्वं भवति ३।३।५

सर्वमनवद्यं विक्षेपाभावात्　…　…　३।३।६

एतदनन्यभक्तिप्रकारत्रयं निर्दुष्टं भवति सर्वत्र विक्षेपप्रतिबन्धकत्वसामान्यात् ३।३।६

न निन्दति नच स्तौति सूर्य्य इवाचरत्यनन्य-
भक्तः　…　…　…　३।३।७

पूतापूतस्थानमपि स्पृशत्सूर्य इवानन्यभक्तः परां भक्तिमभिसम्पन्नः सन् विधिनिषेधरहितो भवति ३।३।७

जलस्थाम्बुजवल्लोकैर्न लिप्यते　…　३।३।८

अनन्यभक्तो लोकमध्यस्थोऽपि सद्भिरसद्भिर्वा लोकैर्लिप्तो न भवति। यथा लोके अम्बुस्थमपि अम्बुजपत्रमम्बुनापि न लिप्यते३ ३।८

लिप्त इवाचरति निर्लिप्तः ... ... ३।३।६

अनन्यभक्तः लोकेऽलिप्तोऽपि लिप्त इव कर्माऽऽचरणं करोति ३।३।९

संग्रहार्थमपरिचयार्थं वा लोकभीतः ३।३।१०

अनन्यभक्तः मामनुवर्त्तमाना लोकाः कर्माऽऽचरन्तु इत्यनुसंदधानः कर्माऽऽचरति। लोका मां मा परिचिन्वन्तु इति लोकभीतो वा कर्म्मणि प्रवर्त्तते ३।३।१०

विक्षिप्तायतेऽविक्षिप्तः सङ्गभीतः ... ३।३।११

निरुक्तभक्तः अविक्षिप्तोऽपि सङ्गभयाद्विक्षिप्त इवाऽऽचरति ३।३।११

क्वचित्तारयति दीनं दीनवात्सल्यात्सदुपदेशैः ... ... ३।३।१२

निरुक्तभक्तः संयोगात् संसारदुःखानलदग्धं दीनं नैसर्गिकदीनवात्सल्यप्रेरितः सदुपदेशैस्तमुद्धारयति ३।३।१२

आस्वादयन्नपि नास्वादयति नपश्यति पश्यन्नपि तदेकचित्तत्वात् ... ... ३।३।१३

निरुक्तभक्तः आस्वादनादिवृत्तीः रसनादिभिः कुर्वन्नपि भगवति चित्तैकाग्र्यात् ता वृत्तीर्नानुसंदधाति ३।३।१३

जयति जितेन्द्रियो जितात्मा ... ३।३।१४

निरुक्तभक्तः इन्द्रियमनसी विजित्य परमोत्कर्षेण वर्त्तते ३।३।१४

एषणात्रितयाद्विरमति ... ३।३।१५

निरुक्तभक्तः लोकेषणाः पुत्रेषणा वित्तेषणा जहाति प्रेमात्मकनिरतिशयाऽऽनन्दलाभात् ३।३।१५

स्वात्मनि रमते प्रज्ञो निस्सङ्गः ... ३।३।१६

निरुक्तभक्तः प्रज्ञालाभात् सङ्गरहितो भूत्वा विषयवितृष्णः स्वात्मरूपभगवति क्रीडामनुभवति ३।३।१६

विधुनोति विभुर्वित्तादिविभवं विरागाय ३।३।१७

दीनोद्धारधुरीणो भगवान् भक्तानां विरागाय वित्ताद्यैश्वर्य्यं कृपया हरति ३।३।१७

व्यथयति परिजनापहारैरपमानप्रहारैरभिमान-भङ्गैश्च ... ... ३।३।१८

कारुणीको भगवान् वैराग्यदार्ढ्याय परिजनान् अपहृत्य अपमाने प्रहारं प्रापय्य अभिमानं भङ्गयित्वा भक्तान् व्यथापरिभूतान् करोति ३।३।१८

न चलति धीरो विवेकात् ... ३।३।१९

धैर्य्यशाली भक्तः व्यथाप्रयोजकेषु परिजनापहारादिषु प्राप्तेष्वपि नित्यानित्यविवेकात् लक्ष्यीभूतभगवतः चलितो न भवति ३।३।१९

मोहाद्विचलत्यधीरः ... ... ३।३।२०

धैर्य्यशून्यो भक्तः विघ्नैरभिभूयमानात्वेन मोहितो भूत्वा स्वलक्ष्याद्विचलितो भवति ३।३।२०

उन्नत्यवनत्योः सामरस्यम् लक्ष्यमात्रप्रणिधानात् ... ... ३।३।२१

भक्ता उन्नत्यवनतिदशायाम् एकरसा भवन्ति यतस्ते उन्नत्यवनत्यनपेक्षका उपास्यरूपलक्ष्यमात्रे दत्तचित्ता भवन्ति ३।३।२१

ईश्वरस्य मत्स्यमाधवादिजन्मस्विव ३।३।२२

यथा भगवतः क्षुद्रमत्स्यादिजन्मसु उच्चमाधवपदवाच्ययादवादिजन्मसु भूभारहरणादिलक्ष्यमात्रप्रणिधाना एकरसता दृश्यते ३।३।२२

मृदुतूलिकाप्रखरकम्बलयोरिव निद्रालोः कामुकस्य च ... ... ३।३।२३

यथा निद्रालोः कामुकस्य च पुरुषस्य मृदुतूलिकाप्रखरकम्बलयोः निद्राकामनानिष्पत्तिरूपलक्ष्यमात्रप्रणिधानात् एकरसता भवति ३।३।२३

प्रणिधानं रज्जुसूक्ष्मकवनावधानवत् सखी-नटीकवीनाम् ... ... ३।३।२४

सखीनां घटावधानवत् नटीनां रज्ज्वधानवत् कवीनांसूक्ष्मकवनावधानवच्च भक्तानां लक्ष्यरूपे भगवति प्रणिधानपदवाच्यतन्मात्रानुसन्धानस्भवति। सत्यपि व्यवहारे तदननुसन्धानात् ३।३।२४

तरति करालकलिकालसमुद्रम् नामनावा ३।३।२५

भक्तो जनः दारुणकलिकालसमुद्रम् अस्मिन् युगे अन्तःकरणमालिन्यबाहुल्यात् नामकीर्त्तनान्यसाधनानाम् ज्ञानवैराग्यादीनाम् दुष्करत्वात् रामकृष्णादिनामरूपनौकया तरति ३।३।२५

सदा सिद्धिः साधनेभ्यः सुकरेभ्यो दुष्करेभ्यो-वा सङ्गेन महतां कृपया भगवतः सेवया च गुरोः३।३।२६

सर्वेष्वपि युगेषु भगवत्कृपा महत्सङ्गगुरुसेवामहिम्ना सुकरेभ्यः श्रवणकीर्त्तनादिभ्यो दुष्करेभ्यो ज्ञानवैराग्यादिभ्यः परभक्तिरूपसिद्धिः सम्पद्यते।३।३।२६।

इति तपस्समाधिसमुपलब्धसमस्तशास्त्रस्वातन्त्र्यश्रीमत्सत्यनारायणशर्मविरचितभक्तिसूत्रस्य श्रीसूत्रकारशुश्रूषुनैष्ठिकब्रह्मचारिगुर्वनुग्रहलब्धविज्ञानश्रीबलभद्रदासशर्मकृतश्रुतप्रकाशिकाख्यवृत्ति-सहितस्य तृतीयाऽध्यायस्य तृतीयपादः समाप्तः।

अथतृतीयाध्यायस्य चतुर्थपादः प्रारम्भः।

स्वरूपसारूप्यं योगः ३।४।१

विक्षेपाऽऽवरणरूपाज्ञाननिवृत्त्या जीवात्मपरमात्मनोरेकरूपता योगः ३।४।१

तदेकचित्तताऽपि ३।४।२

तस्मिन् स्वरूपे चित्तैकाग्र्यमपि अव्यवहितपूर्वसूत्रोदितयोग-साधनत्वेन योग इत्युच्यते ३।४।२

तत्र चित्तं तदेकतानं तदाकारेण परिणतं च ३।४।३

तत्र योगे चित्तं स्वरूपाकारेण परिणतं च स्वरूपैकतानताम्भजते ३।४।३

अवस्थानत्रयविलक्षणमवस्थानम् ... ३।४।४

योगसिद्धौ जाग्रत्स्वप्नसुषुप्तिविलक्षणं तुरीयपदवाच्यमवस्थानं भवति ३।४।४

इन्द्रियमनोबुद्धीनामनुपलब्धिः .... ३।४।५

तत्र योगे इन्द्रियवृत्त्यनुपलब्धेः जाग्रद्विलक्षणता मनोवृत्त्यनुपलब्धेः स्वप्नविलक्षणता बुद्धिवृत्त्यनुपलब्धेः सुषुप्तिविलक्षणता भवति। अत एभ्यो विलक्षणम् तुरीयाऽवस्थानं प्रसिद्ध्यति ३।४।५

चिदाकारस्फुरणम् ... . ३।४।६

तत्र योगे चिदाकारः स्फूर्य्यते। संशयादिनिराससंवलितज्ञानसाक्षात्कारो भवति ३।४।६

अपेक्षितं नियमनं मरुन्मनसोः ... ३।४।७

योगे प्राणचित्तयोः निरोधोऽपेक्षितो भवति ३।४।७

एकस्मिन्नियमिते सत्युभयनियमनं समानगतिकत्वात् ... ... ३।४।८

प्राणचित्तयोर्मध्ये एकस्मिन् प्राणे चित्ते वा निरुद्धे सति द्वयोर्निरोधो भवति एतयोः समानगतिकत्वप्रसिद्धेः ३।४।८

सेवेयन्मनोदृग्भ्यां त्रिकुटिमध्यम् घ्राणाग्रं बाह्यमन्यत् किंचिद् भास्वरं सूक्ष्मं वा ... ३।४।९

योगाभ्यासी युगपत् मनोदृष्टिभ्यां त्रिकुटिपदवाच्य भ्रूमध्यं नासिकाग्रम् अन्यत् किञ्चिद् भास्वरं सूक्ष्मं वा वाह्यं वस्तु सेवयेत् ३।४।९

अभ्यसेदजपा मूर्ध्वमधश्च परिवर्त्तनाद्वाय्वोः ३।४।१०

योगाभ्यासी प्राणापानयोरूर्ध्वाऽधोगमनशीलयोरजपाभ्यासात् गा[illegible]ः परिवर्त्तयेत् ३।४।१०

संचरत्प्रकाशः ... ... ३।४।११

मनोहरभ्यां त्रिकुटिमध्यादिसेवने प्रथमं चञ्चलः प्रकाशो भवति ३।४।११

ततो निश्चलः ... ... ३।४।१२

तदनन्तरमभ्यासपाटवान्निश्चलः प्रकाशो भवति ३।४।१२

आनन्दांशानुभवश्च ... ... ३।४।१३

निश्चले प्रकाशे आनन्दस्य कोऽपि अंशोऽनुभूयते ३।४।१३

प्रायस्तमसोऽपि सम्भवः ... ... ३।४।१४

कस्यचित्प्रायः अभ्यासाऽदार्ढ्ये तमोऽपि आविर्भवति ३।४।१४

तदनादरनीयम् निरोद्धव्यञ्च निरन्तराभ्यास-युक्ताहारविहारादिप्रयत्नात् ... ३।४।१५

आविर्भूतं तम आदरनीयन्न भवति किन्तु श्रद्धाऽभ्यासनैरन्तर्य्य-युक्ताहारविहारादिप्रयत्नेभ्यो निरोधनीयं स्यात् ३।४।१५

मूर्च्छादिभूमिकानामुपस्थितिः ... ३।४।१६

मूर्च्छानिद्राशून्यविज्ञानकृतकृत्यताग्रहादिभूमिका कालेकाले आवि-र्भवन्ति ३।४।१६

उपस्थितेरनैयत्यम् .... ३।४।१७

निरुक्तभूमिकानामुपस्थितेः क्रमोऽनियतो भवति ३।४।१७

उदयः शत्रुवर्गस्य मित्रवर्गस्य च ... ३।४।१८

योगिनो भूमिकारूपेण शत्रुवर्गमित्रवर्गयोश्चोदयो भवति ३।४।१८

धैर्य्यमवलम्बनीयमुत्साहसाहसौ च ... ३।४।१९

शत्रुवर्गोदये योगिभिर्धैर्यमवलम्बनीयम् उत्साहसाहसौ च विधेयौ ३।४।१९

दाहः शैत्यम् बुभुक्षा तृप्तिर्विषादो हर्ष इत्ये-वमुदयो बहूनाम् ... ... ३।४।२०

अभ्यासिनः भूमिकारूपेण क्वचिद्दाहः क्वचिच्छैत्यम् क्वचिद्बुभुक्षा क्वचित्तृप्तिः क्वचिद्विषादः क्वचिद्धर्षः क्वचिद्रोदनम् क्वचिद्धास्यम् इत्यादि बहूनां शत्रुमित्रवर्गाणामुपस्थितिर्जायते ३।३।२०

उत्थानं वायोः ... ... ३।४।२१

अभ्यासिनः पुण्यपुञ्जोदयान्निरन्तरदीर्घकालसत्कारसेवितादभ्यासात् मूलाधारस्थितोऽपानो दण्डकारेणोर्ध्वगतिको भवति ३।४।२१

मार्गशुद्धिः ... ... ३।४।२२

चक्रस्थितकफाद्यर्गलम् उत्थित वायुरपनयन् मार्गं शोधयति ३।४।२२

चक्रभेदः ... ... ३।४।२३

चक्रेषु उत्थितवायुप्रवेशाद्भेदनंभवति मूलादुत्थितवायोश्चक्रेषु प्रवेशात्क्रमशस्तेषां भेदनम्भवति ३।४।२३

शक्तिबोधोऽपि ... ... ३।४।२४

अपाने ऊर्ध्वगतिके सति सुप्ता कुण्डलनी सार्धत्रिवलयाकारा तदाघातवशाज्जाग्रद्वस्थामवाप्य दण्डाकारा सती ऊर्ध्वगमनशीला भवति ३।४।२४

योगनिद्रा ... ... ३।४।२५

शक्तीश्वरसमागमाऽनन्तरं समाधिपदवाच्या योगनिद्रा सम्पद्यते ३।४।२५

निद्राविच्छेदः ... ... ३।४।२६

कञ्चित्कालमभिव्याप्य निरुक्तनिद्रा आस्थाय पुनर्विच्छिद्यते ३।४।२६

अभ्यासात् कालवृद्धिः .... ३।४।२७

अभ्यासात् योगनिद्रायाः कालवृद्धिः ३।४।२७

अभ्यसेदहिंसको मिताहारी .... ३।४।२८

यद्यपि यमनियमा अनेके सन्ति तथापि तयोर्मध्ये अहिंसामिताहारयोरत्यावश्यकत्वेन विधेयत्वाद् योगी अहिंसकः मिताहरी भूत्वा योगमभ्यसेत् ३।४।२८

कौशाद्यासने सुखासीनः समकायशिरोग्रीवः ३।४।२९

अभ्यासी यथा सम्भवं चैलाजिनकुशोत्तरे आसने कुशासने अजिनादौ वा सुखासीनः सन् समकायशिरोग्रीवो भूत्वा योगमभ्यसेत् ३।४।२९

विषयविक्षिप्तमनसः पौनः पुन्येनात्मनि निवेशनं यत्नात् ... ... ३।४।३०

अभ्यासी विषयविक्षिप्तमनः यत्नात् वारं वारं भगवद्रूपात्मनि निवेशयेत् ३।४।३०

ऐकाग्र्यम् ... ... ३।४।३१

ततो विक्षेपादिनिराकरणपुरस्सरो ध्येयवस्तुनि मनस एकतानता निरवच्छिन्नधाराप्रवाहो भवति ३।४।३१

शून्याविर्भावः ... ... ३।४।३२

वायौ जीर्णे सति निर्विषयत्वदशायां शैथिल्यमापन्नस्य मनसः शून्याऽवस्था सम्पद्यते ३।४।३२

आनन्दसन्दोहः .... ३।४।३३

आनन्दप्रचयस्योत्थानम्भवति ३।४।३३

निरोधश्च ३।४।३४

तदनन्तरं मनसो निरोधाऽवस्था असम्प्रज्ञातसमाध्यपरनाम्नी सम्पद्यते ३।४।३४

आत्मज्ञानम् .... ३।४।३५

तद्धेतोरात्मज्ञानम्भवति योगिनः ३।४।३५

ततो व्युत्थानं यथा सुप्तस्य .... ३।४।३६

योगी सुप्तोत्थितवत् समाधेरुत्तिष्ठति ३।४।३६

प्रेमसमुद्भवः परस्मिन् शुद्धस्वरूपे ३।४।३७

शुद्धस्वरूपे परमेश्वरे सार्वकालिकः प्रेमा दृढभूमिकः समुत्पद्यते ३।४।३७

तत्संस्था परमा शान्तिः .... ३।४।३८

प्रेमसंस्थितौ सत्यां परमा शान्तिरुपस्थीयते ३।४।३८

ततः सदेहमुक्तिः ... ... ३।४।३९

तच्छान्तिसम्पत्या भक्तानां जीवन्मुक्तिर्वरीवृत्यते ३।४।३९

विदेहमुक्तिश्च .... ३।४।४०

जिवन्मुक्तिसम्पन्नो भक्तः प्रारब्धव्यपगमे देहवियोगात् विदेह मुक्तोऽभिधीयते ३।४।४०

गुरुमुखादवगन्तव्यम् ... . ३।४।४१

इद योगरूपभक्तिसाधनं गुरुमुखादवगन्तव्यम् गुरूपदिष्टार्थस्य सिद्धिप्रयोजकत्वात् ।३।४।४१

उपदिष्टः सारांशोऽतिसंक्षेपात् .... ३।४।४२

योगस्य साधनस्य सारांशः अतिसंक्षेपेण उपदिष्टः ३।४।४२

सकलजड़जातद्वैतमिथ्यानिर्णयपूर्वक–
सच्चिदानन्दाद्वैतात्मैक्यबोधो ज्ञानम् ३।४।४३

जड़जातद्वैतस्य मिथ्यात्वं निर्णीय सच्चिदानन्दात्मनाम् जीवानाम् अद्वैतात्मकतया ऐक्यबोधो ज्ञानमुच्यते ३।४।४३

सच्चिदानन्दात्मास्तीति ज्ञानम् परोक्षम् ३।४।४४

सच्चिदानन्दात्मनः ईश्वरस्यास्तित्वबोधः परोक्षज्ञानमुच्यते ।३।४।४४

सच्चिदानन्दात्माऽस्मीतिज्ञानमपरोक्षम् ३।४।४५

अहं जीवात्मपदवाच्यः वस्तुतः सच्चिदानन्दात्मरूपपरमात्मा अस्मीति बोधोऽपरोक्षज्ञानमुच्यते ।३।४।४५

गुरूपसत्तिपूर्वकश्रवणमनननिदिध्यासनानि
साधनानि तस्य .... ३।४।४६

गुरुसमीपगमनानन्तरं गुरुमुखोपदिष्टं श्रवणम् । ततः शास्त्र-युक्तिभ्यां तदनुकूलविचारो मननम् । विजातीयप्रत्ययनिरोधपूर्वक-सजातीयप्रत्ययप्रवाहीकरणम् निदिध्यासनम् । एतानि ज्ञानस्य साधनानि भवन्ति ।३।४।४६

ततः साक्षात्कारः ... ... ३।४।४७

एतत्साधनानन्तरं अद्वैतात्मप्रत्यक्षता भवति ३।४।४७

षट् सम्पत्तिरपेक्षिता ... ... ३।४।४८

शमदमोपरतितितीक्षासमाधानश्रद्धाः श्रवणादौ अपेक्षिता भवन्ति ३।४।४८

चित्तशुद्धिर्व्यपेक्षाशमादिसिद्ध्यै ३।४।४९

शमादिनिष्पत्त्यै चित्तशुद्धिः विशेषेणापेक्षिता भवति ३।४।४६

विहिताविहितकरणाकरणाभ्यां पापनिर्हर-णाच्चशुद्धिः ... ... ३।४।५०

चेतसः शुद्धिः नित्यनैमित्तिककर्माऽऽचरणात् निषिद्धकर्म्माऽनाचर-णात् सति पापे प्रायश्चित्ताच्च सम्भवति ।३।४।५०

शास्त्राऽध्ययनमप्यपेक्षितमधिकाराय ३।४।५१

परभक्त्यगभूतज्ञानसाधने अधिकाराय शास्त्राऽध्यनमपि अपे-क्षितं भवति ३।४।५१

अहमोऽनवकाशः परिच्छेदाऽसत्वात् ३।४।५२

अहङ्कारसम्बन्धिसत्तायाः सम्भावना न विद्यते तस्य सत्ता-सम्पादक देहादिपरिच्छेदानामभावात् ।३।४।५२

असत्त्वमेतेषां मायिकत्वाभ्युपगमात् ३।४।५३

एतेषां परिच्छेदानां शास्त्रे मायिकत्वस्वीकारात् असत्त्वं सिद्ध्य-ति ३।४ ५३

एक एव सर्वान्तर्बहिरवभासमान आत्मा गुहाप्रविष्टोऽप्रविष्टश्च ३।४।५४

अहङ्कारस्य देहाद्युपाधीनां च असत्त्वात् वस्तुतः एक एवात्मा अन्तःकरणानि प्रविष्टः तान्यप्रविष्टश्च सर्वान्तर्बहिरवभासमानः सत्तासामान्येन अद्वैतरूपस्वप्रकाशो विद्यते ३।४।५४

व्याप्नोति ब्रह्माण्डमध्यम् तदूर्ध्वं तदधश्च ३।४।५५

अपरिछिन्न अद्वैतात्मा ब्रह्माण्डं मध्यतः ऊर्ध्वतः अधस्तात् व्याप्नोति ३।४।५५

तत्राऽसङ्ख्यब्रह्माण्डसमावेशो यथोदम्बर-सूक्ष्मजन्तूनाम् .... ३।४।५६

अद्वैतात्मनि असङ्ख्यातानि ब्रह्माण्डानि समाविशन्ति अनन्त रूपत्वात् यथोदम्बरफले असङ्खयाः सूक्ष्मजन्तवः ३।४।५६

न सम्भवत्यहम्भाव आत्मैक्यमात्राभानात् ३।४।५७

अद्वैतात्मनिर्भासे आत्मैक्यमात्रज्ञानात् अहङ्कारो न सम्भवति ३।४।५७

अपरिच्छिन्नत्वं परिच्छेदवाधनात् ... ३।४।५८

उपाधीनां निरसनात् आत्मनः परिछेदराहित्यं सिद्ध्यति ३।४।५८

आकाशैक्यमिव घटासत्त्वे सिद्धमात्मैक्य-मसत्वे परिच्छेदानाम् ... ३।४।५९

यथा अनेकघटावच्छिन्न आकाशः नानात्वेन प्रतीतः सकलघट भङ्गे आकाशैकत्वेन सिद्ध्यति। तथ नानापरिक्छेदाऽवच्छिन्नोऽद्वैता-त्मापरिच्छेदनिरासे निष्पन्ने अद्वैतरूपत्वेन सिद्धयति ३।४।५९.

व्यवहारो नानात्वम् ... ... ३।४।६०

आत्मन एकत्वे मायया नानात्वप्रतीतिर्व्यवहार उच्यते ३।४।६०

अनानात्वं परमार्थः ... ... ३।४।६१

परमार्थप्रतिष्ठायामद्वैतपदवाच्यमनानात्वं निर्भासते ३।४।६१

स्वर्गनरकौ जन्ममृत्यू पुण्यपापे सुखदुःख इत्येवं सर्वं व्यवहारः ... ... ३।४।६२

व्यवहारदशायां स्वर्गनरकजन्ममृत्युपुण्यपापसुखदुःख बन्धमोक्षा इत्यादिप्रकारेण सर्वे पदार्था व्यवहारकुक्षिं प्रविशन्ति ३।४।६२

नाहमस्मि न नानास्ति स्फुरत्येक एव सर्वेश्वरः शुद्धसुखरूपसर्वाभिन्न इत्यात्मज्ञानम् ३।४।६३

अहन्ता नानात्वरूपमायाकल्पितसत्तानिरासेन निर्मायसुखरूपावस्थितिः आत्मज्ञानप्रतिष्ठा वेदितव्या ३।४।६३

ततस्तस्मिन् प्रेमसमुद्रेकः संस्कारात् ३।४।६४

आत्मज्ञानानन्तरम् तस्मिन् परमेश्वरे भक्तानां स्वाभेदज्ञानेन कृतकृत्यादिग्रहसंवलितः पूर्वसंस्कारप्रयुक्तः अवाङ्मनसगोचरः कश्चित्प्रेमसमुद्रेको विलसति ३।४।६४

ततः संस्कारानुदयः ... ... ३।४।६५

निरुक्तप्रेमसमुद्रेकोपस्थित्यनन्तरम् संस्कारानामनुदयो भवति प्रेमसम्प्लुतत्वात् ३।४।६५

प्रेमाभिन्नसच्चिदानन्दात्ममात्रस्फुरणम् ३।४।६६

संस्कारानुदये सति प्रेमैक्यमापन्नः केवलः सच्चिदानन्दात्मा स्फुरति भक्तानामितिशेषः ३।४।६६

अयथापूर्वं व्यवहार आप्रारब्धात् ३।४।६७

परप्रेमसम्पन्नानां भक्तानां प्रारब्धस्थितिपर्य्यन्तम् पूर्वव्यवहारविलक्षणो व्यवहारो जायते ३।४।६७

व्यपगतो व्यवहारभारः ... ... ३।४।६८

निरुक्तभक्तानां व्यवहारस्य भारो निवर्त्तते ३।४।६८

आत्मनि विश्रान्तिः ... ... ३।४।६९

पूर्वं व्यवहारभारपरिश्रान्ता भक्ताः परप्रेममहिम्ना भगवदात्मनि विश्रामं लभन्ते ३।४।६९

शान्तिः ... ... ३।४।७०

तदा भक्तानांचिरकालिकोद्वेगव्यपगमाच्छान्तिः सम्पद्यते ३।४।७०

यावदायुर्विलम्बः ... ... ३।४।७१

कैवल्यप्राप्तौ यावदायुर्विलम्बो भवति ।३।४।७१।

विमुक्तविमुक्तिः ... ... ३।४।७२

आयुरपगमे जीवन्मुक्तानां विदेहमुक्तिर्भवति ।३।४।७२।

अनुत्क्रान्तिः ... ... ३।४।७३

सकलोपाधिक्षयाद् भक्तानां व्यापकत्वसम्पत्तेः क्वचिदपि उत्क्रान्तिर्न भवति यथास्थिताः वर्त्तन्ते ।३।४।७३।

शाश्वतिः शान्तिः शाश्वतिः शान्तिः ... ३।४।७४

अनन्तकालव्यापिनी शान्तिर्भवति ।

वंशं पूर्वापरं तारयन्त्यतीर्थानि तीर्थीकुर्वन्ति पतितान् समुद्धारयन्ति धन्याः कल्याणमूर्त्तयो भक्ताः ... ... ३।४।७५

परमपूजनीया भक्ताः कल्याणरूपधारिणः स्वकीयं पूर्वापरं वंशं तारयन्ति । अतीर्थस्थानं स्वागमनेन तीर्थी कुर्वन्ति । स्वकीयदर्शन स्पर्शसंलापैः पतितान् पावयन्ति । इतिशम् ।

इति तपस्माधिसमुपलब्धसकलशास्त्रस्वातन्त्र्य
श्रीमत्सत्यनारायणशर्मविरचितभक्तिसूत्रस्य
श्रीसूत्रकारशुश्रूषुनैष्ठिकब्रह्मचारिगुर्वनुग्रह
लब्धविज्ञानश्रीबलभद्रदासशर्मकृत
श्रुतप्रकाशिकाख्यवृत्तिसहितस्य
तृतीयाध्यायस्य चतुर्थः पादः
समाप्तः ।

समाप्तश्चायं ग्रन्थः

श्रीमती करुणामूर्त्तः साध्वी लक्ष्मीवती शुभा ।
महाराज्ञी मदे तस्यास्तस्यैग्रन्थोऽयमर्पितः ॥ १ ॥

ओं नमः श्रीगुरवे ॥ ॐ नमः श्रीपरदेवतायै ॥
ॐ नमः श्री गणेशाय ॥

॥ अथ विष्णुस्तुतिः ॥

ब्रह्माण्डामितवारिबिन्दुजलधे विष्णो विभोऽनन्तभो,
यन्त्वां नैव परिच्छिनत्ति समयो देशो न वा वस्तु वा॥
तत्रानल्पमहिम्नि भूम्नि भगवत्यल्पीयसी मे मति,
र्निबन्धं कुरुते गिरा प्रचरितुं त्वय्यस्तुगीर्धी गतौ॥१॥
नित्यव्याप्यखिलात्मनि त्वयि तथानन्त्योपपत्तिःश्रुता,
वाणीमानसयोर्गतिं त्वयि यतो वाचः प्रभृत्या गिरा॥
वेदो देव नीराकरोत्यसुभृतामल्पज्ञता विश्रुताऽऽ,
रम्भोःसम्भव एष ईश्वर तनौवैश्वर्य्यतस्सिद्धयतु ॥२॥
सत्यत्वात्तव नित्यताभ्युपगमस्सम्भित्तनोस्साक्षिणो,
विष्णुत्वं विष्लृधातुबीजमुदितव्यापित्वनिष्पादकम्
प्रत्यक्त्वादखिलात्मता च सकलोपादानभावात्तथाऽ,
ध्यासाद्ध्वस्तमतिर्ज्जनोल्पमतिरित्याश्रूयते स्मर्यते॥३॥
तूष्णीं संस्थितिमेव देव भवतो मन्ये स्तुतिं यद्यपि,
संस्कारं हि चिरन्तनं विसदृशं रोद्धुल्लँपन्नुत्सहे ॥
व्यासस्यापि च शङ्करस्य च तथान्येषां कृतिर्दृश्यते,
व्याप्येदन्त्वथवा त्वया हृदिगतस्सम्प्रेरितो व्याप्रिये॥४॥
कीटस्यापि च भृङ्गतास्ति विदिता भृङ्गाभिसंन्ध्या जग

त्याभीरी च तथागता प्रतिहता रासोत्सवे कान्तताम् ॥
भिद्बुद्ध्यामपि तत्वमुक्तमनयोर्निर्ग्रन्थिभावे ऽपि नो,
द्वैतं स्थास्यति किम्प्रमाणवचसा त्वय्यात्मताम्पश्यताम् ॥
यद्यप्यस्म्यहमप्यनादिनिधनश्चिन्मूर्तिरानन्दथु,र्या-
थात्म्येन न चावयोरपिमनाग्भेदः परात्मात्मनोः ॥
हाहा हन्त तथापि ते विधिकरी मायेयमत्यद्भुता,
मां नौ नर्तयति प्रपञ्चनगरे विस्मारयत्यात्मताम् ॥६॥
सेयं त्वद्विमुखान् प्रनर्तयति चेत्तत्रास्ति को विस्मय,
स्त्वन्निष्ठानपि हन्त नर्तयति सा कंयंव्यवस्था वद ॥
मायायास्तरणन्त्वयैव कथितं युष्मत्प्रपन्नात्मनां,
गीतायां विजयाय विस्मृतिरियं वृद्धस्वभावादुत ॥७॥
सिद्धिस्साधनमन्तरा नहि भवेदित्यत्र चेदुत्तरं,
कर्ता कारयिता त्वमेव भगवन्साध्यं किमत्रापि मे ॥
भोक्तापि त्वमिहासि किं यदिवदेस्सत्यं न मे भोक्तृता,
भात्येषाप्यसतीसतीव जगति स्वप्नोपमेऽज्ञानतः ॥८॥
श्रोतव्यः श्रुतिवाक्यतः प्रथमतो मन्तव्य आत्मा ततो,
युक्त्या गीर्भिरतोऽस्य वेदविहितं कार्यं निदिध्यासनम् ॥
सन्तत्या विसदृक्सदृक्त्वविषयौ पूरौ क्रमात्संस्कृते,
रुद्धोद्भाव्यविनष्टविस्मृतिरसावात्मा स्वयं राजताम् ॥९॥
इत्येवं बिधिरस्ति वेदविहितस्सोयं विधिस्सिद्धये,
पद्येस्मिन् विनिवद्धयतेऽस्तुतिमये तुभ्यन्नमो देवहे ॥

किंवाच्यं त्वयि निर्गुणे प्रचरितुं वृत्तिर्न गौणी क्षमाऽ,
सङ्गत्वाज्जहती तथाप्यजहती सर्वात्मभावात्तथा॥१०॥
वृत्तोरूढसमाह्वयेन्द्रियपथाद्दूरे न शक्ता त्वयि,
स्यान्नो यौगिकवृत्तिरप्रकृतिके निष्प्रत्ययेऽत्र क्षमा॥,
अद्वैतात्मनि मुख्यवृत्तिरखिलाप्येवं निरस्ता द्विधा,
सर्वाम्नायवचो विमृश्य भगवत्यस्मद्वचो भ्राम्यति।११।
संसर्गस्तु निरन्वयान्न घटतेऽखण्डैकमूर्त्तौ त्वयि,
वैशिष्ट्यं त्वयि निर्विशेषणतया नो निर्विशेषात्मनि॥
भेदस्स्यादिह केन सार्द्धमथ ते जातित्वनिस्स्वत्वयो-
र्भेदागोचरवस्तुसंस्तुतिगिरा स्यादप्रकारा न किम्।१२।
पारोक्ष्यं विनिहन्त्यहङ्कृतिरियं सर्वानुभूता सती,
चित्कुड्येऽनुभवाख्यचित्ररचना त्वञ्चित्परोक्षः कथं
आनन्दं भगवन्तमाह भगवन्नाम्नायसीमन्तिनी,
नानन्दानुभवो भवत्यसुभृतां प्रत्यक्षताऽन्नो हता॥१३॥
आत्मानीदृग् तादृगित्यपि गिरा सत्त्वापलापक्षता
निर्वाच्यन्न वदामि येन भविता वैयर्थ्यपातस्स्तुते॥
वेदेषूपनिषत्सु सूत्रविततौ भाष्ये तथान्यत्र वाऽऽ
रम्भोसम्भव एष ईश्वर तवैवैश्वर्य्यतस्सिद्ध्यतु॥१४॥
नैवाम्नायवचांस्यलं विधिमुखादव्यक्तसाक्षात्त्वयि,
तस्मात्ता निपरन्निषेधमुखतस्तात्पर्यवृत्या प्रभो॥
आनन्त्येपि फलन्त्यतन्निरसनाद्देवे निषेधावधा,

वस्थौल्याद्यवधारणेन विदितः किञ्चिन्न यत्तद्भवान्॥१५
नानन्दप्रतिबिम्बवृत्तिरसि धीर्नो वा मनोऽसि प्रभो,
प्राणो नासि नवा शरीरमसि भोस्त्वं पञ्चकोशातिगः॥
यत्तत्तन्मयतां श्रुतिर्वदति तत्सम्वित्तिमार्गक्रमः,
सप्तोडुप्रभृतिक्रमादवयति प्राज्ञो यथारुन्धतीम्॥१६॥
नानन्दप्रतिबिम्बवृत्तिमुखतः प्रोक्तं त्रिकं त्वं भवेः
कादाचित्कमनाद्यनन्तभगवान् सच्चित्सुखात्माश्रुतः
प्राणस्त्वञ्च कथम्भवेरशनया युक्तस्तथोदन्यया,
स्वाराज्यामृततृप्तनित्यसुखभूस्त्वञ्चिन्नभस्वान् जडः
व्यस्तध्वस्तममेध्यमन्नविकृती रेतोसृगुत्थं कथं,
स्यास्त्वं देव शरीरमामयमयं शुद्धिस्वरूपोऽच्युतः॥
मुञ्जोपाकरणान्तरञ्च लभते लोकोयथेहेषिका-
मेवङ्कोशविवेककृच्च लभते सर्वान्तरं त्वां सुधीः॥१८॥
वस्त्रादान्तरतन्तुरस्त्यपि ततस्तन्त्वान्तरश्चान्तर,-
स्तस्मादान्तर एवमेव भविता यत्रान्तरत्वावधिः॥
तत्रासावनुमीयतामणुतमस्तन्तुष्पटारम्भकः,
सूत्रात्माप्यनुमीयतामिहभवानेवं जगत्कारणम्॥१९॥
आरब्धं जगदेतदस्ति भवता वस्त्रं यथा तन्तुभिः,
किन्त्वेवम्भविता विवर्तवचनान्नारम्भवादस्त्वयि॥
सर्वाश्चर्यमयेऽच्युते परिणतिप्राप्तिस्तथात्वे कथं,
योऽन्तर्यामितयान्तरोसि गदितस्तं त्वाम्प्रपद्ये परम्॥२०

नाणुत्वं परिशङ्कनीयमिहते वैशेषिकैस्सम्मतं,
मन्यन्ते नहि तेऽणुचित्त्वमथतेऽनेकाणुवादास्स्फुटम् ॥
रूपादि प्रतिपादयन्त्यणुगतं कर्माप्यदृष्टानुगं,
चित्त्वं निर्गुणएक एव भवसि स्पृष्टो न कर्मादिभिः ॥२१॥
किंवाच्यो महिमा मया भगवतो विस्मापकोऽवग् दृशां,
ख्यातोऽणुत्वसमाप्तिभूरपि भवान् ज्ञातो महत्त्वावधिः॥
याथात्म्यादवयन्ति देव सुधियस्त्वां सर्वभावावधिं,
यद्वाश्चर्यमयं चराचरमयं मायामयं चिन्मयम् ॥२२॥
बुद्ध्यध्यस्तमणुत्वमाहबुधगीरौपाधिकं न स्वतो,
रन्ध्रज्योतिरणुत्ववद्धृदिगताभासाणुता कल्प्यते ॥
कृत्स्नाङ्गेषु तवाणुतां न सहते सीतातपव्यापिता,
प्रोक्ताणुत्वहतावपुःपरिणतिश्चैतन्यमात्रादपि ॥२३॥
निर्णीतः परिशेषतः किलभवानेकः परात्मा महन्,
यद्रोम्णां विवरेषु भ्राम्यति मुहुर्ब्रह्माण्डभाण्डायुतम् ॥
वाताध्वोपमितेष्वनन्त भगवन् रेणूपमं सर्व्वदा,
ब्रह्मन् सन्ततिरस्तिसोपिभवतोदेवोमहीयान्विराट्॥ २४
खं ब्रह्मेतिवचोनिरूपितवियद्रूपस्य ते ब्रह्मणो,
नान्तं गन्तुमलं भवन्त्यपि भवन्निश्श्वासभूतागिरः॥
आकाशान्तगतौ समीरगतयोऽप्येते गरुन्मन्मुखा,
श्शक्ताःकिंविहगाभवन्ति भगवन्विष्णोभ्रमन्तोमुहुः२५
अन्धग्रामकरीव दर्शनवने विद्वद्भिरुत्प्रेक्ष्यसे

सांख्यास्त्वामचितं प्रधानमवयन्त्येतज्जगत्कारणम् ॥
युक्तं तन्न तदैक्षतादिवचनैश्चित्कारणं यच्छ्रुतं,
तज्ज्ञानं गुणसाम्यतः प्रतिहतं यत्सत्त्वसम्भावितम्॥२६॥
साम्ये सत्त्वसमाश्रया यदि चितिस्सम्भावनीया भवे,
त्स्यादेवाप्यचितिः समत्वसमतासत्त्वे तमस्संश्रया॥
चैतन्यं हि समाश्रितैव जनता वेत्री च कर्त्री तथा,
नोचेन्नृत्यतु दर्शयत्वभिनयञ्चित्रार्पिताप्युर्वशी॥२७॥
याप्येषा कृतिरुच्यतेऽचितिमतो दुग्धस्य वत्सार्थका,
तत्राप्यन्तर्यामिता भगवतः श्रुत्या न किं श्राव्यते ॥
व्याप्यैवात्र चिदात्मनश्चितिकृती दृश्येत ईशस्य ते,
नोचेत्प्रस्तरपुत्तलीस्तनपयस्तद्वत्सकैः पीयताम् ॥२८॥
वह्न्यूर्ध्वज्वलने च निम्नगमने वारामधिष्ठात्रिता
भीषास्मादिनिवाग्बलेन भवतो विद्वद्वरैर्मन्यते ॥
क्षित्याकर्षणशक्तितो गुरुतया गच्छन्ति वारीण्यधो
गच्छत्यूर्ध्वमगौरवेण च मरुन्मित्रं हुताशोऽथवा॥२९॥
तिष्ठन्नन्तर एषु भूप्रभृतिषु श्रुत्या नियन्तोच्यसे,
तेषां स्यादुपचार एव शरणं यैर्मन्यतेऽचित्कृतिः ॥
सिद्धयेरन्ननपेक्षया तव चिदम्भोधेः प्रकृत्या कथं,
भूतिस्थाननिरोधनानि भगवन्निस्संज्ञया तुच्छया ३०
ऊचुस्ते महदादिमश्रुतगणं लोकेऽप्यलब्धं हि तत्,
नात्मार्थः प्रकृतिञ्च रोहति यतो भूतप्रभूतिश्रुता ॥

श्रौताचारविचारशुद्धहृदयो विद्योदयात् स्वस्थधीः
सांख्याचार्यकपोलकल्पितकथांविद्वान्प्रतीयात्कथम् ३१
ब्रूते यन्महतः श्रुतिश्च परतामव्यक्त इत्युच्यतेऽ,
व्यक्तत्वं तत्र गीतया भगवता प्रोक्तं तथा गीयसे।
पुल्लिङ्गान्महतो महत्प्रकृतिकात् त्वं वै महीयानतो,
ब्रह्म त्वां महतोविराट्पुरुषतो व्यक्तं परं सिद्ध्यसि॥ ३२
त्वामाहुः परमाणुमस्य जगतो हेतुञ्च वैशेषिकाः
कर्मादृष्टनियुक्तमेतदणुकद्धन्द्वं युनक्तीति ते ॥
प्राहुस्तद्व्यणुकादिकक्रमकृतं व्यस्तं समस्तं जगत्,
कुत्रादृष्टसमन्वयोऽद्य भवितादेहादद्यभावादिह॥३३॥
नादृष्टंजडकर्मनोदनविधौ शक्तं स्वतन्त्रं जडं
जीवाधिष्ठितिरप्यचित्त्वविहता तस्याद्यदेहं विना,
देहावस्थहृदात्मयोगजगुणा ज्ञानादिका आत्मनो,
मन्यन्ते किल तैरनेन विधिना यत्नादिरप्याहतः॥३४॥
साहृष्टेन च पूरुषेण भविता सम्बन्ध एषाम्प्रभो,
नाणूनां सततप्रवृत्तिपतनं दोषेऽनिवार्यस्ततः ॥
स्याद्धेचोद्भवनं सदैव जगतां नापीतिसम्भावना,
मोक्षस्यापिनसम्भवोऽभ्युपगतोनान्योंनियन्तापितैः ३५
अएवोर्यन्निमिलितं कणादकथितं तत्सर्वदेशे भवे,
देकस्मिन्नुत देश इत्युभयथा तस्यास्ति नोसम्भवः ॥
आद्ये लीननया परस्परमणू स्यातामणुत्वस्थितौ,

नैरस्यं परमाणुगं कणभुजा प्रोक्तं द्वितीये हतम् ॥३६॥
अण्वंशांशतदंशकल्पनविधौ प्रागुक्त दोषस्थितिः,
कार्यं काल्पनिकं भवेदसदितिव्याघातपातो महान् ॥
स्यादेवाप्यनवस्थितिश्च महती तुल्यो गिरीरेणुना,
तस्माद्वेदशिरोमतश्शबलितस्त्वं मायया कारणम्॥३७
नाप्येवं परमाणुकारणविदां सुस्थो भवेदप्ययः,
कर्मात्राप्यणुभाजकं कणभुजो नालं निमित्तं विना ॥
दृष्टादृष्टनिमित्तताव्यपहतिः स्याद्ध्यपूर्वं यथा,
हा हा स्थूलदृशां विमोहनविधावाप्तः कणादोप्ययम्॥
सुस्थानाणुगतस्वभावघटना दोषस्थितेस्सर्वथा,
भङ्गाभावधिया प्रवृत्तिरणुगा स्वाभाविकी व्याहता ॥
सर्गाभावधिया प्रवृत्तिरपि सा स्वाभाविकी विप्लुता,
शीतोष्णत्ववदेकदाप्युभयथास्वाभाव्यवादः कथम् ३९॥
कालादिपरिवर्त्तनाय भविता नालं स्वभावस्य यद्,
भूतिस्थाननिरोधनानि जगतां सिद्ध्येयुरेषां मते ॥
प्राक् प्रत्युक्तनिमित्ततानुसरणात् ।कलादिरद्यापि कः,
शेषाच्चानुभयस्वभाववचनात्तूष्णीं स्थितिःस्यादणौ४०
नाणूनामणुता कणादकथिता सुस्था तथा नित्यता
तेषामभ्युपगम्यते कणभुजा रूपादिमत्वं यतः ॥
स्थूलं भङ्गिघटादिवस्तु सकलं रूपादिमद् दृश्यतेऽ,
निष्टं स्याच्च किमप्यणोरणुतरं नित्यन्तथा कारणम्४१

स्थूलं भङ्ग्युतं यथा क्षितितले तन्तूनपेक्ष्याम्बरं,
दृष्टं किञ्चिदपेक्ष्य कारणमणुस्स्थूलश्च भङ्गी न किम्॥
सत्येवं परमाणुवादिसमयो नैवोपपत्तिल्लँभे,
न्मायायाम्प्रतिविम्बितश्शबलितस्त्वंलीलयाकारणम्४२
चातुर्गुण्यवती क्षितिस्त्रिगुणता वारिण्यथाग्नौ गुण,-
द्वन्द्वं स्पर्शिसमीर इत्थमणुषु स्यात्तारतम्यं स्थितम् ॥
सत्येगं सुविचार्यतामणुगताधिक्योनताऽऽपादित-
स्थूलत्वक्रमतोऽणुता व्यपहताणूनां चतुर्णां नकिम्॥४३॥
यद्ये कैकगुणा इमेऽएव इति ब्रूयादथन्ताकिंकः,
प्रोक्तव्याहतिवारणाय तदसत् तद्वैपरीत्येक्षणात् ॥
स्युस्सर्वेऽपि चतुर्गुणा यदिमतास्तत्रापि न श्लिष्टता,
पौरस्त्यं किमिहापि न पप्रतितं तद्वैपरीत्येक्षणम्॥४४॥
इत्येवं परमाणुकारणकथाऽनौचित्यसिद्धौ पुनः,
कैवल्ये न निमित्तमीश्वर इति व्यामोह उद्धूयते ॥
हे श्रीकृष्ण जगन्निवास भगवञ्च्छ्रीमन् परात्मन्द्यु मँ,
स्त्वय्येवाद्वयवस्तुनि स्थितमतिस्सिद्धान्तकृत्स्यात्सुधीः
आहुस्त्वां परमेश्वरं प्रकृतिताधिष्टात्रिताभूषितं
सर्वज्ञत्वसमाप्तिभूमिममलं निश्शेषशक्त्याश्रयम् ॥
आनन्दामृतसिन्धुमेकमचलम्भोगापवर्गप्रदं
कैवल्येननिमित्तकारणमिमे वैशेषिका ईश्वरम्॥४६॥
कार्यत्वाद्धिमतं सकर्तृकमिदं कुम्भादिवद्वैजगत्

कर्तारन्तु निमित्तमात्रमवदँस्तर्कागमाईश्वरम् ॥
कालापेक्षफलञ्च कर्मण इमे प्राहुः फलत्वाद्यथा
सेवाजन्यफलञ्चितापरिकरैराद्योऽस्यदातामतः ॥४७॥
ज्ञानैश्वर्यसमग्रतावधिरयं तैरीश्वरो मन्यतेऽ
सामञ्जस्यमनेकधात्र समयेऽस्यास्माभिरुद्घाट्यते ॥
हीनं मध्यममुत्तमं विदधतः प्रत्यक्षतः प्राणिनं
रागद्वेषप्रसक्तमस्य भविता वैषम्यमव्याहतम् ॥४८॥
कर्मापेक्षफलप्रदे विषमताऽयुक्तेत्ययुक्ता कथा
सम्भाव्याजडकर्मणाचितिमतः कर्तुः कथम्प्रेर्यता ॥
प्रेर्यत्वे जडकर्मणश्चितिमता वैषम्यदोषस्थिति-
श्चान्योन्याश्रयता प्रसक्तिरहता स्याच्चानवस्था सदा४९
सर्वस्वार्थमिहेहते विदधतः स्वार्थोऽस्य सम्भाव्यतां ।
स्वार्थेऽनीश्वरता प्रसक्तिरहतास्यादस्य संसारिवत्॥
दृष्ट्वान्यानिह दुःखितान् करुणया साधुस्स्वयन्दुःखित-
स्तद्दुःखस्य निवृत्तये प्रयतते स्वार्थप्रयुक्तोप्यसा ५०
प्रेर्यत्वं घटते नचेश्वरकृतं योगादयसत्वादणो
रेतैरभ्युपगम्यतेऽवयविता नाणोर्यतश्चेशितुः ।
सत्येवञ्च विहन्यतेऽभ्युपगताऽधिष्ठात्राधिष्ठेयता
प्राक्सृष्टेः किमधिष्ठितम्भवति तत्कर्त्राद्यदेहं विना५१
नेत्रादीन्ययमीश्वरः पुरुषवन्नाणूनधिष्ठास्यति
नोचेत्स्यादयमिश्वरोपि न कथं भोक्तेहजीवात्मवत् ॥

प्राप्तानीश्वरता प्रसक्तिरहता संसारिवत्संसृतिः
तस्मात्त्वं प्रकृतिर्निमित्तमिति च श्रुत्यैक एवोच्यसे॥५२॥
दृष्टं वस्त्वनुसृत्य तार्किककृता युक्तानुमानस्थितिः
प्रासादादिविनिर्मितिर्दशिगता नैकेन कर्त्रा क्वचित् ॥
एकोऽस्त्यद्भुतमीश्वरो व्यरचयेत्संसारसौधं कथं
यद्यं कर्तृत्वमिहोच्यते लघुतयोपादानताप्युच्यताम्॥५३॥
नस्यादृष्टयनुसारिणी कणभुजा कर्तुर्वपुःकल्पना
ऽतोऽस्यानीश्वरताप्रसक्तिपतनम्भोगस्तथा लोकवत् ॥
योगीनामयमीश्वरोऽपि च कथं बिभ्रन्नुदासीनता
मव्यक्ताम्प्रकृतिं प्रवर्तयति च च्छाया कुतोनाकृतौ॥५४॥
अस्माकन्तु स्वतः प्रमाणनिगमप्रामाण्यभाजां त्वया
भूतिस्थाननिरोधनादिकविधौ शङ्कावकाशः कुतः ॥
अस्य त्वं प्रकृतिनिमित्तमिति च श्रीशः स्वयं शक्तिमान्
लूतातन्तुनि दर्शनेन भवता तत्प्रक्रिया सिद्ध्यति॥५५॥
वैचित्र्याज्जगतो न ते विषमता रागादिभिर्युज्यते
नैर्गुण्यं च यतः श्रुतिस्मृतिशतैरुद्गीयते श्रीमतः ॥
अप्राणोह्ययमना इतिश्रुतिगिरा सिद्धे मनस्के त्वयि
युज्येन्मानसजन्यमश्रुनमिदं रागादिमत्त्वं कथम्॥५६॥
स्याद्दोषानुपपन्नताद्वयतया तादात्म्यसम्बन्धत-
स्त्वं भूतानि स्वयम्प्रवर्त्तयसि भो लीलाविहारःप्रभुः॥
नैघृण्यं विषमत्वमप्यपगतं स्यादम्बुदन्यायतो

दातात्वन्त्वपराध्यसीह न ददन् कर्मानुरूपं फलम्।५७।
प्रेर्यप्रेरकतोपपत्तिरिह तु त्वन्मायया युज्यते
नान्योन्याश्रयतानवस्थितिरिह स्यातामनादिस्थितेः।
किन्नास्माकमचिन्त्यवैभवभवन्मायाश्रयाद्युज्यतेऽ
प्यस्मिन्नद्भुतऐन्द्रजालिकजगत्यास्तामनास्थाचनः५८
नापेक्ष्यैवहि दृष्टवस्त्वनुभूतिं स्याद्वैदिकी प्रक्रिया
तर्कागोचरवस्तुसम्भृतिमयी तर्कैरगम्याभृशम् ॥
स्वस्मिन्स्वं विदधन् स्वतस्त्वयमहोस्वेनैव सर्वेश्वर
स्वस्मैस्वस्यनकस्यतर्कपटुतामुत्पाटयस्यद्भुतः ॥५९॥
नानाकल्पितकल्पनासु कुशलाबुद्ध्यादिवादोद्धता
बौद्धाद्यास्त्वतिपामरा अनवगत्याद्वैतरूपम्परम् ॥
त्वामात्मानमशेष जन्तुतनुषु प्रोतं विनष्टास्स्वयं
हाहाहन्तविनाशयन्त्यपि परानस्मान्भवान्रक्षतु ६०
शाण्डिल्यानुगनारदादिमुनयो जिज्ञासमाना भृशं
श्रीमन्तम्भगवन्तमद्वयमजं नैवाध्यगन्नच्युतम् ॥
यद्यप्याहुरिमेप्रभुम्प्रकृतिताऽधिष्ठातृताभूषितं
व्यूहावस्थचतुर्विधत्ववचनादेतेप्यसम्भाविताः ॥६१॥
ऊचुस्ते परमात्मदेवममलं श्रीवासुदेवम्परं
जीवात्माभ्युपगम्यते च खलु तैस्संकर्षणाख्योऽपरः ॥
प्रद्युम्नो मन इत्यहङ्कृतिरिति प्रोक्तोनिरुद्धश्च तै
रेतेषु प्रकृतिःपरा प्रथमतः कार्य्याणि तेऽन्ये मताः॥६२॥

ते सर्वे भगवन्त एव कथितास्तैरीश्वराश्शाश्वता
आनर्थक्यमनेकताभ्युपगमे स्यादीश्वरस्पर्शिवै ॥
यस्मादीश्वर एक एव हि करोत्यत्त्यञ्जसा पात्यदो
जन्यत्वे तदनीश्वरत्वमहतं नोचेत्प्रतिज्ञाहतिः ॥६३॥
सर्वाम्नायविशालपादपबृहच्छाखानिगूढं प्रभु-
न्त्वामन्विष्य मुहुर्विचित्रमतयो नालम्बभूवुर्बुधाः ॥
ज्ञातुंहन्त भवन्तमत्र च कियान् भूमन्नहं मन्दधी-
स्त्वामात्मानमवैमिकण्ठमणिवद्वाक्याद्गुरोरप्यर्थ ६४
साक्षात्स्वादनुभूयतेऽत्र सकलैः किन्नाहमित्यात्मता
त्वामात्मानमृते जडोऽर्थ इतरः कस्स्यादहं प्रत्ययी ॥
आभासश्चितिरस्तु किन्तु न भवद्भिन्नोप्ययं वस्तुतः
कुम्भावस्थितमुष्णगुप्रतिफलं स्यात्कुम्भभङ्गे कियत् ६५
अंशयंशत्वसमर्थनापि भगवन्नग्निस्फुलिङ्गादिव-
द्गूढार्थोपनिबद्धवेदवचनैर्न श्रूयते वास्तवी ॥
वह्न्यौष्ण्यान्नविशिष्यतेकिलयथातद्विस्फुलिङ्गोष्णता
चैतन्यन्त्वविशिष्टमेव भगवन्नस्यावयोर्वस्तुतः ६६॥
जीवानान्त्वमसीशिताच भवतैतेत्वीशितव्यास्तथा
सम्बन्धोयमशेषलोकविदितश्शास्त्रप्रसिद्धः प्रभो ॥
त्वम्मायाश्रय ईश्वरोसि भगवान् जीवोऽस्म्यविद्याश्रयो
ज्ञानेनाश्रययोस्तयोश्चहतयोःकस्त्वञ्च कोऽहम्प्रभो॥६७॥
त्वां श्रीकृष्ण निरञ्जनं श्रुतिरियं ब्रूते सखायम्मम

यद्भासा वियदादि भाति बलवान् भूयान्निरन्नोपि यः
मामन्धञ्च पुरञ्जनं गतबलं भुञ्जानमन्नन्त्वयं
नोपाधिञ्च्यपि संस्थितिर्विसदृशीन्या यथावयोर्मित्रयोः६८
आवान्देव भवाव एकजनकौ जीवेशभावङ्गता
वेवं सत्यभियोग एष उचितो दायव्यवस्थाम्प्रति ॥
सर्वैश्वर्य्यसमन्वितोऽसि भगवान् त्रैलोक्यसाम्राज्यवान्
हा हाऽहन्तु दुरन्तरोदरदरीपूर्त्यै भ्रमन् भिन्नधीः ॥६९॥
सातत्येन तवैकरस्यमहतं पूर्णत्वमव्याहतं
सर्वत्राहमहो मुहुर्भ्रमिरिव भ्रान्तः परिश्रान्तधीः ॥
मुक्तस्त्वं सततं प्रबुद्धपुरुषो बद्धोस्म्यहं मुग्धधी-
र्मिथ्यैतास्सकलाः प्रथा अपि न किं भान्त्यद्य सत्या इव ॥७०
ऐक्यं लक्षणयाऽत्र भागपरया स्यात्तत्त्वमोरर्थयोः
प्रत्यक्त्वपरोक्षतादिगुणयोस्त्यागाच्च चित्त्वग्रहात् ॥
तत्तेदन्त्वनिराकृतौ भवति तत्पिएडैक्यसिद्धिर्यथा
सोयंवीरवरेतिवाचि कृपया द्वैताद्भयाद्रक्ष माम् ॥७१॥
आब्रह्मेन्द्रसुरेषु मानवगवाश्वादिष्वशेषेषु य-
द्भूतेषु स्थिर जङ्गमेषु विततञ्चैतन्यमेकम्परम् ॥
येनैवेन्द्रियमन्तरिन्द्रियमिदं स्वस्वक्रियासुस्थितं, तद्ब्र-
ह्मात्वमहं सदास्मि भगवन् प्रज्ञानशब्दोदितः ॥७२॥
रज्जौ लोचनकर्णवज्जगदिदञ्जातं यतश्श्रूयते
यस्मिँस्तिष्ठति गच्छति प्रविलयम्मायामयम्भङ्गुरम् ॥

सत्यंज्ञानमनन्तमद्वयमतद्व्यावृत्तमत्यद्भुत—
न्तद्ब्रह्मत्वमहं सदास्मि भगवन्प्रज्ञानशब्दोदितः ७३
बुद्धेस्साक्षितया स्थितंवपुषि यत् पूर्णं स्वतश्श्रूयते
स्वस्मादन्यतया चराचरमिदम्भातञ्जगद्यन्मयम् ॥
सर्गेहोपरतिस्वरूपमखिलैर्मायागुणैरुज्झित–
न्तद्ब्रह्मत्वमहं सदास्मि भगवन्प्रज्ञानशब्दोदितः॥७४॥
क्षीरेक्षीरमथाम्बु चाम्बुनि तथा तैले च तैलम्प्रभो
क्षिप्तं तन्मयतांप्रयातिचतथात्वय्यात्मनित्वात्मवित् ॥
कैवल्यात्त्वदभिन्नतामुपगतो ब्रह्मैव न ब्रह्मवित्
तद्ब्रह्मत्वमहं सदास्मि भगवन्प्रज्ञानशब्दोदितः॥७५॥
अध्यारोपितभूतभौतिकमयग्रामे विरामङ्गते
ब्रह्मज्ञानयुगान्तभानुकिरणज्वालावलोचुम्बिते ॥
यत्किञ्चिच्चिदखण्डमद्वयमनाद्यन्तं सुखं शिष्यते
तद्ब्रह्मत्वमहं सदास्मि भगवन्प्रज्ञानशब्दोदितः॥७६॥
यच्चेदम्पुरुषे तथाच सवितर्य्येकं स्थितं श्रूयतेऽ—
वस्थानत्रितये स्फुरत्यपि च यद्वेदे चतुर्थं श्रुतम् ॥
यच्चेदं सकलन्न किञ्चिदपि यद्गम्यं त्वगम्यञ्चय-
त्तद्ब्रह्मत्वमहं सदास्मि भगवन्प्रज्ञानशब्दोदितः॥७७॥
यस्यास्ते सकलासु दिक्षु वसतिर्भूतस्भवद्भाविवियद्
भक्तानामपि योगिनामपि सतां हृद्यस्तियस्यस्थितिः॥
यज्ज्ञानाञ्जननिर्मलीकृतदृशामन्तर्बहिर्द्योतते

तद्ब्रह्मत्वमहं सदास्मि भगवन्प्रज्ञानशब्दादितः ॥७८॥
चिन्मात्रं श्रुतवस्तु शून्यखखखाकाशाब्धिवस्वामिते
भूतेष्वेकमवस्त्ववचिच्च सकलन्देहाद्यहन्तावधि ॥
कश्चाहं त्वमसावशेषजड़ताबाधेऽवशिष्टञ्चयत्
तद्ब्रह्मत्वमहं तथाहमपितत्त्वं नास्ति नामाद्यमे ॥७९॥
निद्रारम्भ विरामधामवसतिर्यास्वस्वरूपस्थिति
स्स्वानन्दप्रतिमामनोमयजगत्सीमा सुधामानिमाम् ॥
पथ्यन्यस्तसमस्तमोहमहिमाहन्तास्मिताविस्मृति
तद्ब्रह्मत्वमहं सदास्मि भगवन्प्रज्ञानशब्दोदितः॥८०॥
यद्वत्फेनतरङ्गबुद्बुदगणं सिन्धुस्थित विस्तृत-
न्तत्रैव प्रविलीयते पुनरदोनामापि न श्रूयते ॥
तद्वन्मय्यनुलीयते जगदिदं कैवल्यमुद्योतते
त्वद्भक्त्या गुरुदेवदेवदयया धन्यःकृतार्थोस्म्यहम् ८१
मायासुप्तिमुपस्थितेन विविधादृश्याविदृष्टामया
भूमीपुत्रकलत्रवित्तपशवोऽसत्त्वेपि सत्त्वङ्गताः ॥
अद्यास्मिन्निजबोधजाग्रति समायाते निरस्ताश्चते
त्वद्भक्त्या गुरुदेवदेवदयया धन्यःकृतार्थोस्म्यहम् ८२
स्वं सन्तं यदसन्तमध्यगमतज्ज्ञानात्सुषुप्तौ पुरा
जानाम्यद्यतमेव देव सततं सन्तन्तुरीयस्थितिः ॥
एतद्विस्तृतविश्वमण्डलमहो पश्यपन्नपश्याम्यह-
न्त्वद्भक्त्या गुरुदेवदेवदयया धन्यःकृतार्थोस्म्यहम्८३

कर्तृत्वादिकबुद्धिरद्य विगता च्छायेवमत्सङ्गिनी
कर्त्तव्यन्त्वपि नष्टमद्यसकलं जातिर्विजातिर्नमे ॥
देहाद्भिन्नतया ममाद्ध्यचितोगोत्रं कुलं नामकि-
न्त्वद्भक्त्या गुरुदेवदेवदयया धन्यःकृतार्थोस्म्यहम्।८४।
मूकत्वम्बधिरत्वमान्ध्यमशनोदन्या न सन्त्यद्य मे
धर्माधमव्यवस्थितिश्रुतगतिः कामादयो येऽखिलाः ॥
देहाद्भिन्नतया न सन्ति मम ते क्लेशो विपाकाशयौ
त्वद्भक्त्या गुरुदेवदेवदयया धन्यःकृतार्थोस्म्यहम्८५
जाड्यम्मोहतुषारजन्यमधुना ज्ञानाग्निदूरीकृत-
म्मय्येषाप्रियमोदतादिलहरी लीनासुखाम्भोनिधौ ॥
सत्येसत्यमतिस्तथाऽसति च सद्बुद्धिर्विदीर्णाभिदा
त्वद्भक्त्या गुरुदेवदेवदयया धन्यःकृतार्थोस्म्यहम् ८६
चेतश्चिन्तयतु प्रसादसुमुखं राधाधवम्माधवं
जिह्वारामरसायनम्पिवतु वा वृन्दावनङ्गच्छताम् ॥
पादौदीनजनाययच्छतुधनं हस्तः किमेतैर्मम
साक्षी केवलचिन्मयोहमधुना कुर्वे न वा कारये ॥८७॥
कायःशुष्यतु वातपानतपसा योगैस्तथा पुष्यतु
गंगास्नानरतोस्तु वा कुलवधूसङ्गानुरक्तोऽथवा ॥
भिक्षार्थम्भ्रमतु त्वपैतु न गृहात् तोषात्किमेतैर्मम
साक्षी केवल चिन्मयोऽह मधुना कुर्वे न वाकारये ८८
किंगृह्णामि चकिन्त्यजामि भगवन्किंयाचिायामिकिं

किञ्चिद्वस्तु न भात्यसत्सदपि वा स्वात्मातिरिक्तं क्वचित्
पाताले दिवि मर्त्यलोक इह च व्याप्तो ह्यन्तर्बहिः
पूर्णस्तार्णजगत् पयोनिधिरहन्निस्तार्णसर्वाश्रमः ।८६॥
स्वात्मानन्दघनाद्वयामृतरसास्वादातितुच्छीकृत-
त्रैलोक्याधिपतित्वभूत्यनुपमप्रोद्यत्सुकीर्त्यावली ॥
चञ्चच्चन्दमरीचिराजिसुखमासम्भिन्नदिङ्मण्डलो
नास्म्यस्मीत्यनुचिन्तयन्नहमहो कस्माद्विलीनः क्वचित्
अज्ञानं यदनादिकालिकममून्मांश्चामयद्ग्लापय
त्तापैस्तापयदाधिभौतिकमुखैर्मातुस्स्तनम्पाययत् ॥
नानाभौतिकभूमिकाश्च विदधद्याम्येपरे स्थापय ।
त्तच्चाद्य प्रपलाय्य कुत्र गतवत्किंवाहतं विद्यया॥६१॥
अर्द्धं स्वस्य कलत्र इत्यभिमतिः पुत्रेयमात्मेति च
क्षेत्रे सद्मनि बान्धवादिषु तथा स्वात्मीयताऽऽसीत्पुरा॥
मित्राप्योरिह मध्यवर्तिनि तथोदासीन आसीत्पुरा,
तत्तद्बुद्धिरथाधुना च तनुते ब्रह्मैव लोकत्रयम् ॥६२॥
योसावात्मतया पुराभवदथ स्वामीयतातस्त्वयि
देहोभोगविलासवित्तविभवैः सम्पालितो लालितः ॥
अद्यालीकतया विभात्ययमथ ब्रह्मात्मना भाति वा ।
कञ्चित्कालमवाप्य विट्कृमिभसित्याख्योभविष्योथवा ६३
किंवाच्या भगवन्मया तव कृपानिस्सीमशर्मप्रदा
योसावासमहःप्रभो कमलिनी पत्राम्बुवच्चञ्चलः ॥

अद्याहन्तु स एव निश्चलतया निर्वातदीपोपमः ।
कूटस्थोस्मि न सन्ति मे विकृतयस्ताअस्तिताद्याश्चषट् ६४
भर्तुन्दुर्दशबान्धवानहमहोपश्यम्मुखं दुर्दशां
योसावद्य स एव राज पटली कोटीररत्नावली ॥
रश्म्यालीभिरहं प्रभोऽनुसवनन्नीराजिताङ्घ्रिद्वय
स्साधूनां हृदयङ्गमोस्मि भगवन्ब्रह्माद्वयंवस्तुतः ॥६५॥
कामान्धः कृतवानहं न किमहोनिन्द्यं।चरित्रम्मुहुः ।
कान्ताकौतुककामुकेन कलितः कालः कलङ्कीकृतः ॥
रोचन्तेऽप्सरसोपिनाद्यन च वा रम्यंवनं नन्दनं ।
कामोस्तङ्गतवानथाहमभवम्ब्रह्मामृततत्वङ्गतः ॥ ६६ ॥
नाहं नत्वमयं न कोपि भगवन् त्वामन्तरा दृश्यते
आवां नापि वयं तथा न च युवां यूयं नवेमाविमे ॥
अद्वैतं किमपि प्रभो सुखमयं सन्निर्विशेषम्बृह-
च्चैतन्यं सदसच्चराचरमयं ब्रह्माऽद्वयं शिष्यते ॥६७॥
आत्मन्येवरतिस्समाहितमतिस्तत्रैवतृप्तिश्चमे
किङ्कार्य्यं किमकार्यमस्ति विगतत्रैगुण्यबन्धस्य मे ॥
किन्तुप्राक्तनसंस्कृतिर्भगवती त्वां स्मारयन्ती सती
त्वद्ध्यानामृतसागरे सुखमये माम्मज्जयत्यजऽसा ६८
ब्रह्माहं चतुराननोस्मि भगवान् विष्णुश्चतुर्बाहुधृक्
गौरीशोहमनङ्गभङ्गरसिको गङ्गाधरश्शङ्करः ॥
देवोहं मनुजोस्मि युग्मरसनोयक्षोस्मि रक्षोऽप्यहं

सर्वोहं सचराचरोस्म्यहमहो ब्रह्मास्म्यहं नास्म्यहम् ९९
अद्वैतं सततं विभाति वितते द्वैतं निरस्तं ततं ।
सत्सत्त्वात्सदिवावभातमखिलं निस्सत्तया भासते ॥
ज्ञानानन्दमहासमुद्रलहरी काचिद्दरीदृश्यते
श्रीमन्नद्यममाधुनाद्भुनगतो तूष्णीं स्थितीरोचते ॥१००
संस्कारैः प्राक्तनैरद्य प्रेरितस्त्वां नतोस्म्यहम् ॥
ध्यायन्ध्यायम्पदाब्जन्ते मनस्त्वय्यनुलीयताम् । १०१।
गायं गायं गुणग्रामं पायं पायं कथामृतम् ॥
स्मारं स्मारं नामधेयन्तावकं यातुमेवयः ॥ १०२ ॥
यदा यदा धर्मउपैत्यनुन्नतिं
यदा यदा धर्मउपैत्तथोन्नतिम् ॥
तदा तदाऽऽविर्भवसीह भूतलेऽ-
वनाय साधोर्दमनाय दुःकृतः ॥ १०३ ॥
नमस्सुधर्म्माय सुधर्म्मसेतवे
पापोपपापाहधूमकेतवे ॥
भोगापवर्गोभयसिद्धिहेतवे
विराजमानाय सुहृद्यकेतवे ॥ १०४ ॥
नमोऽस्तु तुभ्यं वसुदेवसूनवे ।
वृन्दावने चारितनन्दधेनवे ॥
गृहीतहस्तद्वयवत्रवेणवे ।
लोकत्रयोद्धारकपादरेणवे ॥ १०५ ॥

वृन्दाटवीयामुनवार्विहारिणे ।
सुपुण्यगोपीगणवस्त्रहारिणे ॥
गोवर्द्धनागातपहारिधारिणे ।
नमोऽस्तु ते दानवदैत्यदारिणे ॥ १०६ ॥
नमोऽस्तुते क्षीरसमुद्रशायिने ।
व्रजाधिराज्ञीस्तनदुग्धपायिने ॥
वकानुजाया अपि मुक्तिदायिने ।
कुबेरपुत्रद्वयशंविधायिने ॥ १०७ ॥
नमोऽस्तु ते माथुरभूमिवासिने,
विजित्यशत्रुंस्वजनार्तिनाशिने ॥
विनोदिने द्वारवतीविलासिने ।
प्रमोदिने चन्द्रविकाशहासिने ॥ १०८ ॥

मालवरागे रूपकतालः ।

जय वसुदेवतनय धृतवन्नवतारम् । विविध कृतिं कृतवन्नविकारम् ॥ माधव धृतकृष्णशरीर जय जय सत्यपते ॥ ध्रुवपदम् ॥ धरणिरियं विकला सुरसाधुसमेता । प्रभुकृपया कल्याणमुपेता ॥ माधव ॥ निजजननीजनकौ कृतवन्नविखेदौ स्था पितवञ्जगति स्मृतिभेदौ ॥ माधव ॥ अमरगणाऽभिनु तोगोकुलमसिनीतः । कीरमुखेन मुहुः परिगीतः । माधव ॥ भवतु समस्तसतामतिशयकमनीयं । सत्यभणितमिद-

मतिरमणीयम् ॥ माधव ॥ १ ॥

॥ गुर्जररागे प्रतिमठतालः ॥

विजितसगर्वपुरन्दरव्रजसुन्दर ए, गोपीबृन्द विहार ॥ जय जय सत्यपते ॥ ध्रुवपदम् ॥ कलिमल कलुषविनाशन मुरनाशन ए । दहराकाशविकाश ॥ जय जय ॥ कालियह्रदपरिशोधनजनबोधन ए । कृतबृन्दावनरास ॥ जय जय ॥ मुनिजनकृतपद वन्दन यदुनन्दन ए । शमितसपरिजनकंस ॥ जय जय ॥ उदयतु सुखमनिशं मृदुकिलगायत ए । सत्यभणित मिदमद्य ॥ जय जय सत्यपते ॥ २ ॥

॥ वसन्तरागे रूपकतालः ॥

हृदयसरोरुहदहरविशरगतमनुपमसुखमासारम् ॥ किमपि महो नवनीरदरुचिरं दीनदयालुमुदारम् ॥ इन्दुवदनमानन्द विलासं । नौमि मुकुन्दमनन्तमसङ्गं चन्द्रविनिन्दकहासम् ॥ ध्रुवपदम् ॥ लिङ्गावरण शक्तिबोधनमनुजनितमनाहतनादम् । यत्कृपयैव हि शृण्वन्त्वनुकृततन्त्रीवेणुनिनादम् ॥ इन्दुवदन॥ यस्यजनः किल पश्यति पश्यति हंसं स्वयम्प्रकाशं नश्यति संसृतिरुदयति सत्यस्मृतिरानन्दविकाशम् ॥ इन्दुवदन ॥ प्रणिदधतः प्रणतस्य यदेव हि सिद्ध्यति शुद्धसमाधिः । त्रिपुटीलयमनुनश्यति नश्यति

नश्यति भेदभानजनिताधिः ॥ इन्दुवदन ॥ सत्यदेव विरचितमिदमुदयति यदुपतिपदरतिसारम् ॥ दहरोपासनसरणिविकाशनमतिरसमयसुखसारम् ॥३॥

रामकलिरागे रूपकतालः ।

अर्द्धचन्द्ररुचिरुचिरभालमदतिलकवेणुवरधारी पिच्छमुकुटविस्तृतवक्षस्थल मञ्जुलगुञ्जाहारी ॥ त्रिविधपवन यमुनापुलिने क्रीड़सि केशव कुञ्जवने ॥ ध्रुवपदम् ब्रजरमणीसहितम्परिनृत्यसि गायसि पंचम रागम् ॥ मुनिजनमनसि मनोजनिरुदयति विस्मारयति विरागम् ॥ त्रिविध ॥ हासविलासरास-कौतुक मुग्धगोपिकावृन्दम् ॥ पश्यति देवमपाङ्गविलोकनमनुगायति मृदुमन्दम् ॥ त्रिविध ॥ हस्तगृहीतदेवयुगसङ्गतचन्द्रगोपिकारूपम् ॥ मुग्धमिदं विदधाति सुमण्डलमण्याखण्डलभूपम् ॥ त्रिविध ॥ सत्यसन्धमिह किमपि महः किल भक्तवश्यमितिसिद्धम् ॥ निस्सङ्गं गोपीगणसङ्गतमुपनिषत्प्रसिद्धम् ॥ त्रिविध ॥ सत्यदेव विरचितमिदमुज्ज्वलमद्भुतरसमयगानम् ॥ जनयतु सज्जनमनसि मुदं विधुनोतु कुलाद्यभिमानम् ॥ त्रिविध ॥ ४ ॥

गुर्जररागे एकतालीतालः ।

त्वमसिमुरारे मम संसारे शरणमङ्गलभङ्गः ॥ तवकृपयैव जनोऽपमसङ्गो गञ्जितकालभुजङ्गः ॥ भवभय शमनं त्रिभुवनकमनं कुन्तीतनयसखायं । गोकुलसदनं सुस्मितवदनं नौमिनीलघनकायम् ॥ ध्रुवपदम् ॥ गोपसमेतं केलिमुपेतं गोधनमनुविचरन्तं अशरणशरणं राधारमणं भक्तमनसि विहरन्तम् ॥ भवभय ॥क्षीरधिशयनं जलरुहनयनं खण्डितसज्जनवयनम् ॥ विद्युद्वसनं दाडिमदशनं सौभगपुञ्जनिलयनम् ॥ भवभय ॥ जय जय माधव जयराधाधव देव रुक्मिणीजाने ॥ कुण्डललसितललितगण्डस्थल पाहि सुदर्शनपाणे ॥ भवभय ॥ सत्यदेवकृतिरतिलघुपरिमितिरियमृदु पद्यविलासा ॥ जनयतु हर्षं भक्त्युत्कर्षं भक्तिविलासविकाशा ॥ भवभय ॥ ५ ॥

गोविन्द करुणासिन्धो दीन बन्धोप्रसीदते ॥ अर्पयाम्रिपदाम्भोजे गीतपंचकचम्पकम् ॥१०८॥ त्वमिहसकलशास्त्रगर्भगूढाप्यसिशकलात्मतया मयानुभूतः ॥ किमपि निगदितं गुरुप्रसादाद्भवदर्पितमिद मस्तुसाधु सिद्धयै ॥ १०९ ॥

य इदमनलसः पठेदभिज्ञः सकलमनोरथपूर्त्ति रस्तु तस्य ॥ निजसुखमनुभूय सत्त्वसिद्धं भवतु पुनस्त्वयि निर्गुणे विलीनः ॥ १११ ॥

इति तपस्समाधिसमुपलब्धसकलशास्त्रस्वातन्त्र्य
श्रीमत्सत्यनारायणशर्मविरचिता वेदन्तदीपिका
विष्णुस्तुतिस्समाप्ता ॥ ॐ यदक्षरेत्यादि ॥

ॐ

श्रीगणेशाय नमः ।

श्रीसूर्य्याष्टकम्

आरोग्यं शरणागताय ददते पानीयमाकर्षते,
हस्तैर्जीवनहेतुना वितरते वृष्ट्या च तत्प्रावृषि ॥
ग्रास्तानाददते हुतान्द्विजगणैर्ब्राह्मण्यमातन्वते,
लोकान् योजयते क्रियासु सकलान् सूर्य्याय तुभ्यन्नमः॥ १॥
वीथीषु व्रजते चिरेण तरसाऽऽरोहाऽवरोहक्रमात्,
याते दक्षिणवामयोरयनयोर्भुक्त्यै विमुक्त्यै सदा ।
दातुं द्वादशराशिषु प्रचलते नृणां फलं कर्मणां,
लोकान् योजयते क्रियासु सकलान् सूर्य्याय तुभ्यन्नमः २
ध्वान्तं ध्वंसयते परम्प्रविशतामध्वानमायच्छते,
तेजो वर्द्धयते द्विजातिनिकरे श्रौतीं स्मृतिं रक्षते ॥
हेमन्तप्रभृतीनृतून् विदधते कालक्रमं कुर्वते,
लोकान् योजयते क्रियासु सकलान् सूर्य्याय तुभ्यन्नमः ३
शाम्बं प्रोद्धरते विशीर्णवपुषं विद्विष्टकुष्ठामया,
धृत्या त्राटकमुद्रया गतवते युञ्जन्मनोदृक् पथम् ॥
शब्दम्पाठयते सुकण्ठसचिवं लङ्केशदर्पापहं,
लोकान् योजयते क्रियासु सकलान् सूर्य्याय तुभ्यन्नमः।४।
सौरान् रञ्जयते दरिद्रजनतागुप्त्यै समाधावते

पीयूषम्पिवते शिरस्थजलजस्थेन्दोरधो हि द्रुतम् ॥
मन्देहाह्वयराक्षसान् विजयते विप्रार्पितादर्घतो,
लोकान् योजयते क्रियासु सकलान् सूर्य्याय तुभ्यन्नमः।५।
ब्रह्माऽध्यापयते मुनिं यजुरिति श्रीयाज्ञवल्क्याह्वयं,
प्रोद्यन्मण्डलरश्मिभिः शशिकलां कल्यं तिरस्कुर्वते ॥
शीतं वारयतेऽत्र शीतसमये शीत्कारकृत्प्राणिनां,
लोकान् योजयते क्रियासु सकलान् सूर्य्याय तुभ्यन्नमः६।
साक्षित्वेन शुभाशुभान्यसुभृतां कर्माणि सम्पश्यते,
गायत्रीजपतत्परान् द्विजवरान् सत्कुर्वतेऽर्घादिभिः ॥
लोकान् द्वादशमण्डलैः प्रतियुगान्तं भस्मसात्कुर्वते,
लोकान् योजयते क्रियासु सकलान् सूर्य्याय तुभ्यन्नमः७।
वंशं प्रोन्नयते स्वकीयमवनीपालैर्दिलीपादिभिः,
कामम्पूरयते निरामयकृदायुर्वेदविद्यानताम् ॥
अस्मान् पालयते पदाम्बुजयुगं प्राप्तानन्नाथान्जनान्,
लोकान् योजयते क्रियासु सकलान् सूर्य्याय तुभ्यन्नमः८
सूर्य्याष्टकमिदम्पुण्यं यः पठेत् प्रयतो नरः ॥
आयुरारोग्यमैश्वर्य्यं प्राप्नुयात्तत्प्रसादतः ॥ ९ ॥

इति तपस्समाधिसमुपलब्धसकलशास्त्रस्वातन्त्र्य भोपाह्व
मैथिलश्रीसत्यनारायणशर्मविरचितं श्री
सूर्य्याष्टकं सम्पूर्णम् ॥

॥ श्रीःपातु ॥

॥ श्री गणेशायनमः ॥

बोध विंशतिका

वन्दे वेदान्तवेद्यम्बहुविधविभवं वन्द्यमानं वरेण्यंबृन्दावाटीविलासम्बलिबलिबलिनं वासुदेवंवदान्यम् विश्वंव्युत्थापयन्तं विरमणविधिना वारयन्तं विधानं व्युत्थं विद्योतयन्तं वितरतु विमलाम्ब्रह्मविद्यां विमुक्त्यै ॥ १ ॥ वैतृष्ण्यं वक्ति वेदो बहुविदि विदितं वस्तुनो वै कृतत्वात् वैरस्यं वर्द्धनीयं विषयविषयिणोर्व्यक्तविश्लेषबुद्धया वैराग्यं वासुदेवो बहुविधि विजयम्बोधयामास विद्वान् विज्ञर्षिर्विज्ञवर्गे विसृजतु विषयान् बुद्धबुद्धो विवेकी ॥२॥ व्यासिर्ब्राह्मी विवेकाद्विषयविषयणी वेदितव्या विविक्ता विश्वस्मिन्विस्फुरन्तम्बहुविधविभवं गौण्णगं वेतुविद्वान् व्यापारो वर्ज्जनीयो व्यवहृति विषयोवञ्चनीयो विधाता विश्वासाद्वेदवाक्ये विरमतु विविधाद्वाग्विलासाद्विपश्चित् ॥३॥ वाणीविन्यासविद्याविविषय विमुखी वेदितव्या वृथा वै विष्णौ विश्रान्तबुद्धिर्विहरतु बहुधा बालवद्वृद्धवृद्धः ॥ ब्रह्मादीनां विभेदो बुधवरवचसा वेदितव्यो वितथ्यो विश्वं वै वेदितव्यं व्यपगतविशयैर्वास्तवम्ब्रह्मवस्तु ॥४॥ विद्व-

द्विर्वायुबुद्धीवसुविधविधिना वारणीये विरागात्
व्याहार्य्यम्ब्रह्मबीजम्बुधवरवचसा वेदितव्यं विधानम्
वाराणस्यां विरोचिर्वियति विचरणाद्वै विकाश्यं वि
काश्यं व्युत्क्रान्तौ वासनाया विलयनविधिना बन्ध-
विध्वंसनंवै ॥ ५ ॥ विज्ञेयो द्विज्ञवाक्यैर्विनियमन-
विधिर्वेगवद्विग्रहस्य बन्धो विध्वंसनीयो विबुधविन-
यिना ब्रह्मविद्याबलेन ॥ वात्सल्यं विश्वबन्धोर्बहु-
विधिविपदां वारणं वै विभाव्यं विष्णोर्विश्वेश-
बन्धोर्विपुलबलवतो बन्धविध्वंसनस्य ॥ ६ ॥
विद्वत्वं वित्तवत्वं वसुविधविभवो बालवाणीविनोदो
वन्द्यत्वं वन्द्यमानैर्विविधविहरणं विप्रचित्यादिभिर्वा
वैध्यां वासो वसत्यांबहुबलविजयो वाक्यविन्यासवत्वं
वैमुख्ये विश्वबन्धोर्बहुविदि विदितं वस्तुविश्वंवृथावै।७।
वैद्यो वष्णुर्विराजो बहुविधविषयव्याधिविध्वंसवैद्यो,
व्यापन्नैर्वन्दनीयो वयुनवटिकया वाधते व्याधिवर्गम्।
व्यालोलत्वं विहाय व्यसनविरहिणा वर्ज्जनीयो विषादो,
वैराज्यं वासुदेवो वितरति विमलब्रह्मविद्यविकाशात्।८।
ब्रूते वाग्वैदिकी वै विहितविविदिषाम्ब्रह्मविज्ञानबीजम्
विज्ञप्त्यावन्दनीयाविदितविविदिषाब्रह्मविद्वद्व्युपा
स्त्या विद्वान् व्यासो वितेने बहुविधविधया ब्रह्मविद्या
विचारं,विज्ञेयो विभ्रमस्य व्यपहननविधिर्वृद्धवाक्यं वि-

चिन्वन्‌ध ॥ व्यासङ्गोवर्ज्जनीयो विधिविहितविधौ वर्त्ति तव्यं विधृत्या व्यावृत्त्या ब्रह्मवेद्यं विकृतिविरहितंव्याघ्र-वृत्तिंविहाय॥व्यालोवैकर्त्तनिवैं विदशति विवशम्बालि-शं वज्रदंष्ट्रो विश्वात्मानं विचिन्त्यव्ययतु विविधं ब्रह्मविश्वं विवेकी ॥ १० ॥ व्यासक्तो व्याधवृत्तौ बुधवरवचसा ब्रह्मवृत्त्या विरेजे वाल्मीकिर्वाग्मिवर्य्यो विहितबहुविधिर्वाक्यविन्यासबुद्ध्यै व्याख्यातव्यो विभाव्यो बुधवरविभवो वन्दनीयो विनम्रैर्विद्वां सम्ब्रह्मविज्ञम्बहुविनयश्चा ब्रह्मविद्यां वनोतु ॥ ११ ॥ वम्बोजं व्युच्चरन्तो विजनवसतयो वारुणीव्युत्थबोधा वार्द्धक्याद्विप्रमुक्ता वनजविभिदया बैधवाधावि हीनाः ॥ वैराज्यं विन्दमाना विपिनविहरणा ब्रह्म-विद्वद्वरिष्ठा विश्वं विस्मारयन्तो विवरविविदिषोर्वन्द-नीया विशुद्ध्यै ॥ १२ ॥ ब्रह्माण्डं वेदविद्भिर्विवरण-वचनैर्बोधितम्बुद्बुदाभम्ब्रह्माण्डम्ब्रह्मवेद्यम्बहुविदिवि-दितम्बुद्बुदो वारिवेद्यः ॥ वैलक्षण्ये विभिन्ना बहु विधविकृतिर्वेदितव्या व्यलीका विश्वं व्यालोकयन्ति व्यपगतविशया ब्रह्मविद्वद्वरिष्ठाः॥ १३ ॥ बूते विश्वं-विवर्त्ताद्विकृतिविसदृशं व्युत्थितम्ब्रह्मणो वै व्यासो विख्यातविद्यो विदलितवसुधाव्यापिविभ्रान्तवादः ॥ विभ्रान्तान्‌ वै विकृत्याव्यवहृतिवचनान्वेदबाह्यान्‌

वदन्ति वर्थ्यां व्यालं विजानन् वदतु बहुविधम्ब्रह्मणि व्यक्तवस्तु ॥ १४ । विश्वामित्रोवसिष्ठो वियति वि-कुपितो विग्रहव्यस्तबुद्धिर्वैहङ्गं व्यापविद्वान् विधि वशविहितं विस्मृतन्ब्रह्मवृत्तिः ॥ ब्रह्माण्डं विक्षिपन्तं विभुवरविभवं वेत्तु विद्वान्विचारात् विक्षेपाद्वै त्विर न्तुं बहुविधविधया ब्रह्मवेद्यं व्युपास्यम् ॥१५॥ वैदु ष्यम्बालिशत्वं वदति बुधवरो ब्रह्मविद्याविरुद्धं वैशिष्ट्यं वैविशुद्धे व्युपदिशति वृथा वञ्चितो विभ्रमेण ॥ वैशि ष्ट्यं वेशयन्तो बृहति वत विभौ ब्राह्मणान्वञ्चयन्ति वेद्योवैशिष्ट्यवादी विरचितवचसा विप्रलापी विमूढः १६ बोद्धव्या वेदबाह्या विहितबहुविधब्रह्मविद्याविवादा वैविध्यम्बोधयन्तो विगतविधविभौ ब्रह्मणि व्यक्त-विश्वे ॥ वैचित्र्यं व्युत्थितं वै वदति विदि बुधो बुद्धि-विभ्रान्तिवेगात् विश्वं व्युत्पन्नबोधो बुधवरवचसा वस्तुतो ब्रह्म वेत्ति ॥१७॥ वेदान्तम्बोधयन्तो विर-चितवचसा वैपरीत्याद्वितथ्यं विश्वस्तान्विप्रमत्ता-न्बहुवितथवचोवल्गनैर्वञ्चयन्तः ॥ विद्वद्भिर्बोधितव्या वत विधिविहता विभ्रमैर्विभ्रमन्तो वन्द्योवन्द्यो विन म्रैर्विसमयविजयी ब्रह्मविज्ञानवादी ॥ १८ ॥ व्युत्प-न्नं व विज्ञेनं वदति बुधवरो ब्रह्मवेदान्तविज्ञो-बुद्ध्वा वेद्यं विदं वै विचरतु विरतो ब्रह्म विश्व-

व्यवस्थम् ।। ब्रह्मत्वम्ब्रह्मवित्त्वं वदति विरहितं वै वि-
भेदेन विद्वान् वेदे वेद्यं विदित्वा विहरतु विगतव्यक्त-
बुद्धिर्विमुक्तः ॥ १९ ॥ विद्याद्विद्यां विमलविभवां
ब्रह्मविद्यां विवेकी विद्याद्वृत्तिं विधिविरचिता-
म्ब्रह्मवृत्तिं विशुद्धाम् ॥ विद्याद्वित्तं विरहविरहं
वित्तवाञ्छावियोगं विद्याद्विद्वान्विनयविवश-
म्बन्धवं वासुदेवम् ॥२०॥ क्वचिद्ब्रह्मपरिज्ञानं क्वचि
द्योगानुशासनम् । क्वचिद्भक्तिरसाख्यानं संक्षेपा-
दिह वर्णितम् ॥ २१ । बोधविंशतिकानाम्नी
मिमाम्पद्यावलीं शुभाम् । शृण्वन्विचारयन्विद्वा-
न्धारयन्प्राप्नुयाच्छुभम् ॥ २२ ॥

इति तपस्समाधिसमुलब्धसकलशास्त्रस्वात-
न्त्र्यश्रीमत्सत्यनारायणशर्मविरचित
बोधविंशतिका समाप्ता ॥

तीर्थपञ्चविंशतिका ।

श्रीरामजन्माऽवनि मातरेत-
च्छृणुष्वकिञ्चिन्मम प्रार्थनीयम् ।
यत्रक्वचिज्जन्म भवेद्दृष्टा
न्न विस्मरेयं रघुपुङ्गवाङ्घ्रिम् ॥ १ ॥

सम्प्राप्यते येन सुपुण्य योगा-
त्सरःप्रवृत्ता सरयूः सुपुण्या ।
तत्तीरवासः क्रियतेक्षणञ्चेत्
समस्ततीर्थीयफलं सुलभ्यम् ॥ २ ॥

नाम्ना यदीयेन समैति मुक्तिं
तदीयनानाचरिताश्रितं यत् ।
स्थानं महत्त्वं किम तस्य वाच्य-
न्नमान्यहंतत्प्रणमाम्यहन्तत् ॥ ३ ॥

मज्जन्ति ये ये सरयूतटिन्या-
मनेकजन्मार्जितपुण्ययागात् ।
तेषान्निवासः स्वयमेवभूमा
मत्सन्निधौप्राह भविष्यतीति ॥ ४ ॥

आद्यात्वमेवासि विमुक्तिदासु
पुरीषु किन्नातिप्रसिद्धमेतत् ।

यत्रत्यलोका सकलाः सहैव
गता हि रामेण गतिं वरिष्ठाम् ॥ ५ ॥

देविश्रीमथुरे यदूत्तमजनुर्भूमेहऽमित्यर्थये
त्वय्यास्थाय दिनाधिनाथदुहितुस्तीरे हरेः कीर्त्तनम् ।
ईहे कर्त्तुमनुत्तमं सुविधिना सासाहिकेनाम्बिके
त्वत्कारुण्यकटाक्षपातत इयं सम्पूर्य्यतां लालसा ॥१॥
दृष्वाते महिमानमद्भुततरं गोलोकधाम्नोऽप्यहो
गर्वो गच्छति खर्वतां मुरहरोऽनादृत्य सन्त्यज्य तत् ।
यस्मात्त्वय्यवतीर्य्य चङ्क्रमणकृत् पादाम्बुजाभ्याञ्चिरं
वैकुण्ठादिसमस्तलौकिक मदध्वंसेतुवाच्यं नु किम् २
नानामन्दिरमालिकासुरुचिराश्वेतो हरा स्वः पुर
स्तुच्छीकृत्यमुरारिमूर्तिमधुरा विद्योतमाना श्रिया ।
दृष्ट्वा हर्षसमुद्रमग्नमनसा यातः कृतार्थोऽद्य ते
भूयस्त्वां प्रणमामि यामि शरणं कायेन वाचा हृदा॥३॥
त्वामाश्रित्य मुरारिभक्तिरसिका विप्राश्चतुर्गेदिनोऽ
नेके सूर्य्यशशाङ्कवंशतिलका भूमीभुजामग्रगाः ।
विक्रान्ता निजधर्म्मपालनपराः कीर्त्याभवन्नुज्वलाः
स्थित्वा त्वय्यतिसम्पदा त्र सुखिनःश्रेणीजनामाथुराः४ः
आलोक्यालोकनीयाम्मधुपुरिसुषमां सर्वलोकोत्तरान्ते
नीरेतीरे तटिन्यास्तवरविदुहितुर्नागरे नागरीये

यत्रानन्दाय वाणी त्वपि कलहमयी प्रेममय्याः कथा का
श्रीमान् प्रेमप्रियत्वाद्धिगतत नुरभून्मूर्त्तिमानत्र कृष्णः५
चामुण्डे दण्डखण्डिन्यखिलयदुकुलक्ष्माभुजामिष्टदेवि
दृष्ट्वा त्वां कोऽपि भावो मनस उदयति प्राक्तनादृष्टयोगात्
याचे त्वां मातरेतत्त्वयि भवतु सदा प्रेम कल्लोललीला
स्वर्गीया नारकीया मम भवतुगति र्जातयोवा विचित्राः

वृन्दावनीयसुषमामहिमानुगाने
चेतोविमुग्धगतिमेति विलज्जमानम् ।
यत्राच्युतो निगमकाननकुञ्जगुप्तो
गोपीसहस्त्रपरिवेष्टितनर्त्तकोऽभूत् ॥ १ ॥

हे नन्दगोपवसतेऽखिललोकनाथ
श्रीवासुदेवबलयोरधिवासभूमे ।
संस्मृत्य बालचरितानि तयोस्त्वयीह
सम्पन्नसत्त्वविकृतेः क्वगतं मनो मे ॥ १ ॥
गोलोकधाम किल भक्तजनानुकम्पी
मर्त्ये समानयत गोकुलनामधेयम् ।
बालोहरिर्निजगणैर्विजहार यत्र
तत्तं व्रजामि शरणं प्रणमामि नौमि ॥ २ ॥
गोपालडिम्भवपुषा कलुषापहारि
गोपालडिम्भकवलं कवलीचाकार ।

यत्राद्वयं सुखमयं च्चिदनन्तमाद्यम्
शेषोऽप्यलङ्किमु नु तन्महिमानुगाने ॥ ३ ॥

इति तीर्थपञ्चविंशतिका समाप्त

हे तीर्थराज भवदीय महानुभावं
नामैववक्ति तव किं बहुवाग्विलासैः ।
कीर्तिं परामतुलितांतव दीपयन्ती
कामप्रदा वहति यत्र नदी त्रिवेणी ॥ २ ॥
स्नात्वा सुपुण्यवशतो मनुजस्त्रिवेण्थां
कृत्वा तथात्र वपनं त्रिदशत्वमेति ।
तेने क्रतूनिह विधिर्जगतां विधाता
तत्त्वां प्रयागमनुगायति सर्वलोकः ॥ ३ ॥
वेणीपदं समुपतिष्ठति पूर्वतोयं
तं माधवं य इह पश्यति शोभमानम् ।
किं दुर्लभं भवितुमर्हति तस्य किञ्चि
द्धर्म्मादिषु प्रचुरभावविशुद्धबुद्धेः ॥ ४ ॥
नो शक्यते कथयितुं मम भागधेयं
गेयं सुरैरपि यतोऽध्यगमम्भवन्तम् ।
अद्य प्रनष्टमखिलं मम पापपुञ्जं
त्वद्दर्शनेन नमनेन च सङ्गमेन ॥ ५ ॥
किं विद्यया विविधकर्मकलापतःकिं
ज्ञानेनकिं सदुपदेश विकाशितेन
विज्ञानतः किमथवाप्यनुभूतिलब्धात्

स्याच्चेत्त्वयीहवपनं विधिवन्नृणांवै ॥ ६ ॥

हे विन्ध्यपर्वतमलङ्कृतवत्यधीशे
श्रीकालिके प्रलयकालपयोदकृष्णे ।
पद्मेऽब्धिजे जयत भारति हंसपत्रे
दीनोहमद्यभवतीः शरणम्प्रपद्ये ॥१॥

नानोक्तिसम्भवविमोहवशंवदोहं
खिन्नः क्रियासु विविधासु परिभ्रमेण ।
प्रारब्धभारवहनादनवाप्तशान्ति
र्दीनोहमद्यभवतोः शरणं प्रपद्ये ॥ २ ॥

माहात्म्यमद्भुततरन्तव किंवदामि
विन्ध्याधरीक्रियत एष यतो सुमेरुः ।
इन्द्रादयो दिविषदो निवसन्तितत्र
त्वय्यासतेप्रकृतयोऽखिलकारणानि ॥ ३ ॥

या कुण्डली तनुभृतां कुहरे शयाना
निश्शेषभीतिवनदीप्तकृशानुरूपा ।
देव्या तया वसतये वनदुर्गया त्वं
यत्स्वी कृतोसि महिमा तव दुर्विभाव्यः ॥ ४ ॥

वन्दे कपालिनमवारणदण्डपाणिं
चञ्चद्विलोलतरकुण्डलमण्डतास्यम् ।
कालाहिकल्पितसुशोभनयज्ञसूत्रं
विघ्नापहं वटुकनाथमगस्थमीशम् ॥ ५ ॥

इति तीर्थपञ्चविंशतिका ।